रतस्सर्वं मस्माभि- रमृतोपमम् ॥४६ ॥ विस्तरा द्वदतो
ताद्रि स्थलमाहात्म्यमद्भुतं ।॥ तीर्थमुर्तिं विशेषंच स्थल
पुण्याविशेषतः॥४७॥ अत्राश्चर्यं यद्यदास्ति तत्सर्वंकृपया
वद॥इतिसर्वेमुनिवरा याचंते रोमहर्षिणम् ॥४८॥ महा
नुभावा स्सद्भक्ता आनन्दोत्कटचेतसः॥प्रार्थयंतोबहुविधं
हरिभक्ति परायणाः ।।४९। एवं मुनीनां वचनम् श्रुत्वा
सूतोमहायशः । आनन्दाश्रुपरी ताक्षो रोमांचि त्कलेवरः
॥५०॥ मीलिताक्ष स्तदा दध्यौ देवं तोताद्रिवासिनम्
मुहूर्तमात्रं स्थितवां श्चित्रित प्रतिमेवसः ॥५१॥ततस्सं
तुष्टहृदयो ह्यथातिकुशलं दिनम्॥मत्वा मुनी न्नम कृत्य
प्रोवाच मधुरांगिरम्॥५२॥ अहोभाग्यवशाद्यन्मे मुनीनां
दर्शनंमहत् ॥ हरेःकटाक्षयोगेन लब्धंतस्यापि कीर्तनम्
॥ ५३॥व्यासप्रसादा द्वक्ष्यामि यत्किंचि न्मनसाधृतं ॥
आदरा च्छ्रुयतां सम्यक् रहस्यं कथयामिवः ॥५४॥एव
मुक्त्वागुरून्ध्यात्वाविष्वक्सेनम्प्रणम्यच॥वाणीम्भक्ता
न्शूकादींस्तान् महाभागवतान्पुरा ।५५॥तोताद्रिस्थल
माहात्म्यं वक्तुं दिव्य कथांशुभां ॥गंभीराचेतसासर्वंज्ञात्वा
तदुपचक्रमे॥५६॥श्रीसूत उवाच॥ श्रुयतां मुनिशार्दुलाः
शौनकाद्या दृढव्रताः॥गुह्याद्गुह्यतमम्वक्ष्ये श्रुयतां सावधा
नतः॥५७॥लोकेप्रसिद्धं सर्वेषां तोताद्रिस्थलवैभवम्॥सा
धुसाधु महाप्रश्नो भवद्भि स्समुदीरितः ॥५८॥ तोताद्रि

स्थलमाहात्म्यं सर्वमंगलकारणम्॥पठनाच्छ्रवणात् पुंसां भक्तिज्ञानफलप्रदं ॥५९॥ रहस्यं भुविसर्वेषां भोगमोक्ष प्रदायकं॥ सर्वार्थसिद्धिदं कीर्ति रात्मज्ञाम् मनःशुचिः ॥६०॥ संभविष्यति सर्वेषांश्रोतॄणां पठतामपि ॥ सर्वपाप हरंपुंसां संचिताघौघमोचनम् ॥६१॥ पावनम् पावनानां च जरामरणनाशनम् अश्वमेधसहस्राणि वाजपेय शता निच ॥६२॥ कृतानियत्प्रदास्यंति तत्फलंकीर्तनाल्लभेत्॥ त्रिवेणी संगमेस्नानम् बहुकालं कृतंयदि ॥६३॥ तोता द्रिस्मरणान्नृणां लभतेनात्र संशयः॥अनन्तकोटिसंसिद्ध कर्मिणांस्थलवैभवं ॥६४॥ श्रोतुंपाठितुमप्येत त्तथामनसि रोचते ॥ नरोचतेतु पापानां रोचते दूषणंयथा॥६५॥यो वाकोवावदेदेतत्स्थलमाहात्म्यदूषणम्॥दूषणम्कृतवान्वि ष्णोः सवैमूढःपतत्यधः ॥६६॥यावच्चंद्रश्च सुर्यश्च चरतो दिविरौरवे॥तत्कालंपीडितःपश्चाच्चंडालो जायतेध्रुवं ६७॥ चंडालकोटिजन्मान्ते शुनांयोनौ जनिस्यतिः दूषको।विष्णु भक्तानामेवंपापमवाप्नुयात्॥६८॥जन्ममध्ये सकृद्भक्त्या तोदाद्रिस्मरणान्नृणाम् ॥ पठनं श्रवणंवापि कृतंचे त्सुकृतीभवेत् ॥ ६९ ॥ सर्वलोकेषुदेशेषु सर्वकालयुगे षुच ॥ देवाश्च पितरस्सम्यक् तोदाद्रिस्थलवैभवम् ॥ ७० ॥ लोकपालाश्च मुनयः सिद्धा स्साध्या श्चतुर्मु खाः ॥ रुद्राश्च वसवस्सर्वे गायन्ति ध्यानपूर्वकं ॥७१॥

वैकुण्ठे श्रीपतिः पूर्वं संतोषेणदयानिधिः ॥ सर्वान्रक्षि
तु मेवंहि गुह्याद्गुह्यतमम्भुवि ॥ ७२ ॥ तोदाद्रिस्थल
माहात्म्यं रहस्यं सर्वमुक्तवान् ॥ सनकादिमुनि श्रेष्ठा
नारदश्चमहेश्वरः ॥७३॥ वैकुण्ठपतिनाप्रोक्तं श्रुत्वासर्वं
यथाश्रुतं ॥ तत्कथां प्रोक्तवान्रुद्रः पार्वत्यै भक्तिपूर्वकं ॥
७४॥ तत्कथां पार्वतिश्श्रुत्वा सरस्वत्याउपादिशत् ॥सर
स्वत्या व्यासमुनि ज्ञात्वा मद्गुरुरुक्तवान् ॥७५॥ तस्मा
दहं प्रवक्ष्यामि तोताद्रिस्थलवैभवं ॥ पांड्यदेशे ताम्र
पर्ण्याम्दक्षिणे योजनावधौ ७६॥ दक्षिणांबुधि तीरस्य
उत्तरेयोजनद्वये ॥ पूर्वांबुधेः पश्चिमेच योजन त्रय
एवाहि ॥७७॥ महेन्द्रपर्वता त्पूर्वे ह्यर्धयोजनमात्रतः ॥
मध्येतोदाद्रि नामेति तत्क्षेत्रं राजतेभुवि ॥ ७८ ॥
[illegible]नामसहस्राणां सहस्रशतजल्पनात् ॥ तत्फलंप्रा
प्यतेलोके सकृत्पठनमात्रतः ॥ ७९ ॥ तोताद्रिनामहि
ब्रह्मा ज्ञातुंशक्तो नवेश्वरः ॥ जात्यंधस्तु यथासूर्यं कां
तिसंघातमीक्षुतुं ॥८०॥ तत्स्थले लोकरक्षार्थ माविर्भु
तस्वयंहरिः ॥ वैकूण्ठलोके कनक सौधमन्दिरराजिते ॥
८१ ॥ सभानिविष्ठः कृपया नित्यै र्भक्तै र्नमस्कृतः ॥
स्तुयमानो मुनिगणैः श्रीपतिः पुरुषोत्तमः ॥ ८२ ॥ वै
कूण्ठा न्निर्गत स्तत्र महद्धामा व्ययंस्थिरं ॥ भुम्यंतरि
क्ष ब्रम्हाण्डम् दिशो विष्णुपदं महत् ॥८३॥ यावत्प्र

माणंतोदाद्रि संज्ञंकोटिरविप्रभं ॥ तावत्प्रमाणं तद्रूपं द्रष्टुंदेवैरगोचरं ॥८४॥ संक्षिप्य रोमशमुनेः प्रदर्शयतुमद्भुतं ॥ चन्द्रसूर्या वुभौपार्श्वे चामरग्राहिणीद्वयं ॥८५॥ मार्कण्डेयो भृगु स्तार्क्ष्यो लक्ष्मी स्सेनापति र्मही॥ संयुक्त स्तैश्चसिद्धार्थे रेकपीठे स्थितोहरिः ॥ ८६॥ आविर्भूत स्स्वयंदेवो रोमशस्य मुनेस्तदा ॥ पंकतामरसंनाम क्षीराब्धि रभवत्तदा ॥८७॥ श्रीवाह्लिमंगकंनाम पुण्यं वैकुण्ठमेवतत् ॥ पारिजातादितरव स्त्वाम्रारण्यं सुनिश्चित ॥८८॥ तत्क्षेत्रे दक्षिणो त्संगे कूर्मपर्वत आस्थितः ॥ तत्समीपे क्षीरनदी प्रवहत्य निशंशुभा ॥ ८९ ॥ तोताद्रौसिकता स्सर्वा स्सालग्रामसमास्स्मृताः॥ तत्क्षेत्रे कूपगोष्पाद तटाकाः पल्वलानिच ॥ ९० ॥ येयेजलाशयास्तत्र सर्वेतीर्थानितेध्रुवं ॥ तत्स्थलेवृक्षरूपेण वसंतिखलुदेवताः ॥९१॥ गुल्माश्च वीरुधश्चैव देवरूपाइतिस्मृतः ॥ तत्स्थलेवासिनां पुंसां सकृद्दर्शनमात्रतः॥ ९२ ॥ पंचपातकयुक्तोपि नरःपापात्प्रमुच्यते ॥ तोताद्रिस्थलवासश्च तथैवैकादशीव्रतं॥९३॥ विष्णुभक्तिश्चतन्मंत्र जपोलोकेषु दुर्लभः ॥ पंकतामरसेतीर्थे स्नात्वा स्थित्वातुतत्तटे ॥ ९४ ॥ एकवारंपठेन्मंन्त्रं तत्कोटिगुणितंभवेत् ॥ गायत्रीजपतांपुंसा मण्डलात्सिद्धिमेष्यति ॥९५॥ अष्टाक्षरं राममंत्रं कृष्णमन्त्रं नृसिंम्हकं॥

॥ जपतां विष्णुरूपंच भविष्यतिनसंशयः ॥ ९६ ॥ तत्ती
रेक्षणमात्रंवा स्थित्वाजपतियोनरः ॥ पावनः समुनिश्रेष्ठः
सर्वेषा मुत्तमोत्तमः ९७ ॥ सएवभगवान्विष्णु श्शंखच
क्रगदाधरः ॥ नर्त्तोरेस्त्रल्प मप्यलं विष्णुभक्ताय दीयते
॥ ९८ ॥ तद्द्रव्यं मेरुणातुल्यं सदातासर्वपावनः ॥ दर्श
ना त्स्मरणा द्वासा त्तद्द्रोः कीर्तनादपि ॥ ९९ ॥ नरः
पापात्प्रमुच्येत मोक्षंचावाप्स्यातिध्रुवं ॥ दक्षिणासहितंत
त्र कोटियज्ञसमंभवेत् ॥ १०० ॥ गजाश्वदासदासीनां
गृह क्षेत्रादि वाससां ॥ तिल तंडुल मुद्गानां मधु क्षीरे
क्षुसर्पिषां ॥ १०१ ॥ कोटियज्ञ फलानिस्यु र्दत्तांदाना
नितत्रवै ॥ इक्षुदंडा श्रयनसं मूलिकाकंदमेवच ॥१०२॥
रुद्रणं तैलपानीये चंदनागरु पद्मकं ॥ अन्नपानीयदानंच
भूषणक्षौमवाससां ॥ १०३ ॥ समस्तानिच दानानि यः
कुर्यादक्षयंविदुः ॥ क्षेत्रोपवासं क्षौरंच तर्पणं श्राद्धमेवच
॥ १०४ ॥ पिण्डदानंविशेषेण पितृणांदत्तमक्षयं ॥ गया
श्राद्धा धिकफलं पितृणां मोक्षकारणं ॥ १०५ ॥ यः
कुर्या त्सर्वदानंहि स्थलेतोताद्रिनामके ॥ पूजितः श्रीप
तिस्तेन नित्यंतोताद्रिनायकः ॥ तस्मात्तोताद्रिणा
तुल्यं नास्तिनास्तिस्थलंभुवि॥इतिश्रीब्रह्मांडपुराणेक्षेत्र॥
वैभवखंडे तोताद्रिमाहात्म्ये प्रथमोध्यायः ॥ ॐ ॥ ॐ

॥ द्वितीयोध्यायः प्रारभ्यते ॥

॥ श्रीमतेरामानुजायनमः ॥

श्रुत्वैतत्संग्रहेणैव शौनकाद्या मुनीश्वराः ॥ पप्रच्छु
र्विस्तरेणैव तोताद्रिस्थलवैभव ॥१॥ विस्तराद्ब्रूहि नस्सू
त तोताद्रिस्थलवैभवं ॥ इत्युक्तो वर्णयामास कथाश्चिव
स्तदाश्रयाः ॥२॥ श्रीसूत उवाच ॥ पुरातोताद्रिनाथस्य
सन्निधौ कालयोगतः । ब्रह्मशापा दपित्यक्तः कश्चिद
श्वर्थमत्रवै ॥ ३ ॥ सिंधुदेशे नृपःकश्चि न्नलपुत्र स्सुभक्ति
मान्॥ हरेः प्रसादादुत्पन्नो गुणशीलइतिश्रुतः ॥ ४ ॥
विष्णुभक्त स्सदाचारो दानशीलः प्रतापवान् ॥ दृढवृत
स्सत्यवादी धर्ममार्गानुगोभुवि ॥ ५ ॥ मनुनीति प्रका
रेण राजाराज्यमपालयत् ॥ तस्यराज्ञोगिरिवनं ह्यवजन्
बहुशोमृगाः ॥ ६ ॥ कदाचि दागताः पुर्यांकिराता वन
चारिणः ॥राजानंदृष्टुमिच्छंतो मन्त्रिणेतव्याजिज्ञपन् ॥ ७
आगतास्मे तिविज्ञाप्य नमस्कृत्वातुयाचितः ॥ विज्ञानी
मन्त्रिणांश्रेष्ठः प्रत्युवाच तथेतितान् ॥ ८ ॥ राजद्वारस
मीपेतुभवाद्भि स्स्थीयतांक्षणं ॥ ततस्समन्त्री विज्ञानी
प्रविष्टो राजमन्दिरं ॥९॥ राज्ञेविज्ञापयामास पुलिन्दाः
केचिदागताः ॥ द्वारितिष्ठंतिराजेन्द्र उपायनकरावहिः ॥
१०॥एवंब्रुवाणंतं वीक्ष्यप्रतिवाक्य मुवाचसः ॥ संतोषेण
तदातास्त्वं मानयस्वेति सत्वरं ॥ ११ ॥ मन्त्री विज्ञा

नि नामाथ तानाहूय प्रजेशितुः ॥ सन्निधौ दर्शयामास नमस्कारपुरस्सरः ॥१२॥ उपायनं ददुस्तस्यकिराताश्च मरीमृगं॥मौक्तिकं गजदन्तंच रक्तचन्दन कुंकुमान् ॥१३॥ रत्नानि विविधान्यस्मै पंचवर्णशुकानपि ॥ एतावद् स्मदानीतं अंगीकर्तुंत्वमर्हसि ॥ १४ ॥ इतिविज्ञाप्यत त्सेवां कृत्वातेव्याचचक्षिरे ॥ तद्वनेस्थातु मस्माक मश क्यंमृगबाधया ॥ १५ ॥ संहर्तुंतांश्चबहुला नश क्यंचत्वयाविना ॥ तस्मात्तत्रनरेन्द्रेण गम्यतां मृगयाकृते ॥ १६ ॥ वहोःकालाद्बहुमृगाः संचरंति मदोत्कटाः ॥ इत्थंतैश्शबरैर्वाचैः श्रुत्वाविज्ञापितंवचः ॥ १७ ॥ वस्त्र चन्दन भूषाद्यै र्बहुमान्यततस्सतान् ॥ भोजनंचददौते षां घृतसूपान्वितंबहु ॥ १८ ॥ तांबूलं पटवासश्च दत्वा तैर्निर्गतोनृपः ॥ मृगान्संहर्तु मुद्युक्तः परिघं पट्टिसं शरान् ॥ १९ ॥ धनुस्तुणीरयुग्मंच तनुत्राणं म नोहरं॥शिरस्त्राणंच राजेन्द्रो गुणशील स्समादधे ॥२०॥ वायुवेगाश्वमारुह्य नीलकंचुकभूषितः ॥ सेनापरिवृतोवीरो वनमध्यमगान्नृपः॥२१॥ वराहान्महिषान् व्याघ्रान् भल्लू कान् गवयान् मृगान् ॥ऋक्षान् सिंहान् गजांश्चैवविनिघ्न न्विचचारह ॥२२॥ नानापक्षिगणान्हत्वा गिरिगह्वरको टरे । हरिणान्हन्तुकामोथ विनतानम्बाशुगान् ।२३। कासारवनमार्गेषु निर्झरेषु तटीषु वा।निक्षिप्तवागुरान्दृष्टा म

गाःसर्वेभिदूद्रुवुः ॥।२४। ततस्ता न्विद्रुत.न् दृष्ट्वा बध्यतां वध्यता मिति। गम्यतामितितान् राजा व्यादिदेशभटा न्बहून् ॥२५॥ इतिराज्ञासमादिष्टा कि.रातांश्च भटास्त दा ॥सिंहनादांश्च मुंचन्तो व्यचरन् संभ्रमाद्वने॥२६॥ त दाष्टापद सारङ्गं दृष्ट्वा सर्वेपिदूद्रुवुः॥तंदृष्ट्वावेगसंपन्न मश्वं वेगात् व्यसर्जयत् ॥२७॥ राजातंसंहरिष्यन्वै चिंतयानु जगामसः॥ यत्रधावतिसारङ्ग स्तत्रतत्रजगामसः ॥२८। बहुदूरंगतःपश्चात् नदृष्ट्वाहरिणंततः। पुरंयातुमनाःकामं निर्वृत्तः पथिमूर्छितः ॥२९॥ सूर्यातपपरीतांगःक्षुत्पिपासा विमोहितः।पुनर्जगाममार्गेतु वनमध्येलतागृहं ॥३०॥ दृ- ष्ट्वाराजाप रिश्रांत स्तुरगादवरुह्यसः॥आश्रमेतुमुनिश्रेष्ठम न्नंयाचितुमुद्यतः ॥ ३१ ॥ पर्णशालां प्रविश्याथ ब्राह्म णंनव्यलोकयत् ॥ विष्णोराराधनार्थाय दधिसूपाज्यसंयुतं । ३२॥ उष्णमन्नंच पानीयंशीतलंतत्रातिष्ठति ॥ नानावि धानि पक्वानि भक्ष्यभोज्यफलानिच। ३३॥कदलीपत्रमि त्येत न्मायथावर्ततेकिमु॥ मांवंचितुंराक्षसेन केनचिद्विहि तंकिमु ॥३४॥ इत्यालोच्य महाराजो मुहूर्तं समातिष्ठत ॥यःकश्चित् ब्राह्मणोविद्वा नाश्रमेनिवसन्मम ॥३५॥दास्य तीतिमहाशापं भीत्यानिश्चित्यतत्रवै।गुणशीलि स्सधर्मात्मा मुहूर्तंसमातिष्ठत ॥३६॥ ब्राह्मणोविष्णुभक्तानां मग्रणीर्ज्ञा निनामपि। कुशासन इतिश्रीमान् मुनिर्गालवपुत्रकः३७।

सोपिमाध्यान्हिकं कर्तुंनदीतीरमुपाविशत्॥तत्रस्नात्वा ब्र ह्मयज्ञं माध्यान्हिकपुरस्सरं ॥ ३८ ॥ कर्मकृत्वा जपंसम्-क्स्थितस्तत्रमहातपाः।राजामुहूर्तमालोक्यपश्चात्क्षुत्पिडितां भृशं॥३९॥गृहीत्वापात्रमन्नंच सूरमाज्यं पयोदधि। शाकादिकं विनिक्षिप्य भोजनं कुरुतेतदा ॥४०॥ कुशासनोपि विप्रेन्द्र स्तोयपूर्णकमण्डलुं ॥ तुलसीपत्रमाहृत्य पर्णशालामुपाविशत् ॥४१॥ भुंजानं नृपतिं वीक्ष्य कोपा दरुणलोचनः॥उवाच नृपतेमूढ कथंशालामुपाविशः ॥४२॥तथापितूर्ष्णींनृपते भोजनम् कुरुषेमुदा । भुक्तमेतत् विषंतेस्यात् सुरापानीयमेवहि ॥ ४३ ॥ शाकंगोमांसमेतच्च विष्णुर्नाराधितोयतः॥ योविष्णो रनिवेद्यान्नं भोजनंकुरुतेद्विजः ॥४४॥ सपापो नरकेघोरे पतिष्यतिनसंशयः। विष्णोराराधनार्थाय यद्द्रव्यं वेश्मनिस्थितं ॥४५॥ तद्द्रव्यं चौर्यकृत्येन गृण्हीयाद्योपि मूढधीः॥ दूषितस्तुसतांवृन्दै रंते रौरवमाप्नुयात् ॥४६॥ तस्मात्वां पापकर्माणं विष्णुद्रोहीणमद्यवै ॥ शपाम्यहं शुनोरुपं धरंश्चरितुमर्हसि ॥ ४७ ॥ इत्युक्तवंतं तंवीक्ष्य नृपःपरमदुर्मनाः ॥ उवाच दीनयावाचा किमर्थंशापितोमुने ॥४८॥ लोकेक्षुधार्त स्त्वज्ञानात् भोजनम् कुरुतेयदि ॥दण्ड्यस्सताडनैस्तस्य सर्वस्वग्रहणंवरम् ॥ ४९ ॥ ममराज्यं गजाश्वादि कोशेचधनमक्षयं ॥गोधनानिच दास्यामि क्षतव्यंमत्कृतंमुने ॥५०॥

एवंनृपीतवाक्यानि श्रुत्वानंमुनिरब्रवीत् ।योविष्णुद्रोहिणो द्रव्यं प्रतिगृह्णाति मूढधीः ५१ ॥ सनरःकोटिजन्मानि चण्डालोजायतेध्रुवं॥मास्तुमास्तु तवद्रव्यंमत्रभाग्यमजान तः॥५२॥श्वाभव न्बहुकालांस्त्वं संचरेत्यशपद्द्विजः॥तस्य शाप ममोघंहि ज्ञात्वानरपतिर्द्विजं ॥ ५३ ॥ उवाच शापमोक्षार्थं उपायंकथयस्वमे ॥इत्येवंप्रार्थयंतंतं नृपतिंमु निरब्रवीत् ॥५४॥ लोकेमुख्यस्थलंयत्र तत्रतेमोचनंभवेत् ॥गच्छेतिमोचितस्तेन मुनिन ह्यवनीश्वरः॥५५॥नृपोपि शु नकोभूत्वा नानादेशेचचारसः॥दैवयोगा द्वनेघं रे नटःकाश्चि त्समागतः ॥५६॥ श्वानंवीक्ष्य महाश्चर्य मेवंश्वानेक्षितो भुवि ॥ विनोदार्थ मयंग्राह्य इतिनिश्चित्यसत्वरं ॥५७॥ श्वानंगृहीत्वा तंघोरा न्निर्गतः सवनान्नटः॥चोलदेशं गत पूर्वं नृपतिंवीक्ष्यतत्वै ॥५८॥ महेन्द्रजालविद्यांच दर्शयि त्वानटोत्तमः ॥ गजाश्व भूषणादीनि वस्त्राणि विविधानि च ॥५९॥ तेनराज्ञासदत्तानि गृहीत्वाचेरमभ्ययात् ॥ वि नोदानिततस्तस्य सदृष्ट्वाचेरभूपतिः ॥६०॥ भूषणानिचमु ख्यानि वस्त्राणिविविधानिच । ताम्बूलं गंधसंयुक्तं दत्वातं ह्यादिदेशह ।६१।ततुग्रहीत्वा नटस्तस्मात् केरलान्प्रतिनि र्गतः।कदाचिदातपमार्गे महावातैश्च पीडितः॥६२॥दूरेपार जनैस्साक माम्रारण्यं सदृष्टवान्॥ तादृक्क्लेश समायुक्तःश्रां तैःपरिजनैर्नटः ॥६३॥ संततंपादपच्छायं मंदमारुत सेवि

तं। श्रवणानन्दजननैः शब्दैःपरभृतामपि ॥६४॥ कीचको च्छेदसंवृत्तं मारुतोद्भूतकूजितं। वेणुगान मिवाभातिरंभानृ त्यातिलासिका ॥६५॥ भेकशब्द स्तालरवो मर्द्दलंमेघग र्जनं। पारावता श्शुकाश्चैव केकीकूजंति नृत्यति ॥ ६६ ॥ हंसाः कारण्डवाश्चैवसंचरंति ततस्ततः। गरुडाःकृष्णनामा नि व्याहरंति मुदान्विताः ॥ ६७॥ एवमादिभि रन्यैश्च पक्षिसंघैश्च शोभिते ॥ तस्मिन्नाम्रवणे पुण्ये नानावृक्षस माकुले ॥६८॥ पंकतामरसंनाम तन्मध्ये तीर्थमुत्तमम् ॥ तस्मिन् मत्स्याश्च नक्राश्च कच्छपाश्च सुघोषिताः ॥६९॥ शुक्तय श्शंखभेदाश्च पद्मानि कुमुदानिच ॥ कल्हाराणि विराजंते तस्मिन्तीर्थतमेसदा ॥७०॥ उत्तुङ्गवीचिकान्यो न्य संघट्टपरिशोभितं ॥ स्मरणादेव संसार तापार्तिच्छेदनं नृणां ॥७१॥ प्रयागतीर्थादाधिकं तत्तीर्थं संददर्शह ॥स्ना त्वातस्मिन्नटस्तीर्थे पीत्वातोयं सुशीतलं॥ ७२॥ सहाग ता स्तथाकृत्वा तेसर्वेन्यव न्सुखं ॥ शुनकस्तु मुनि श्रेष्ठाः स्नात्वा तस्मिन्सुपावने ॥ ७३॥ पंकतामरसेसद्यः शापात्घोराद्विमोचितः ॥ ब्रह्म शापविमुक्तस्तु गुणशीलो नृपोत्तमः ॥ ७४॥ पूर्ववेषेण संयुक्तो बभौतस्मिन्महायशाः ॥गत्वानटसमीपंतु राजावचनमब्रवीत् ॥७५॥ मोचितोहं त्वयाशापा त्घोराब्रह्मवरोदितात् ॥ इत्युक्तस्सनटोराज्ञा सर्वैःपरिजनैर्वृतः ॥७६। ऊचेकिमिदमाश्चर्यं श्वानरेन्द्रोभवे

स्कथं। कोवाशशाप राजंस्त्वां श्रोतुमिच्छामि तत्वतः ॥
७७॥ इतिराजानटेनोक्तः पूर्ववृतांतमब्रवीत्। श्रुत्वासर्वंन
रेन्द्रोक्तं नटस्तुष्टोब्रवीदिदं ॥७८॥ ॥ नटउवाच ॥ यथा
गृहीत्वा बद्धंत्वां सर्वतीर्थेषु सादरः। व्यचरंकुत्रचिदपि ब्र
ह्मशापे नमोचितः ॥७९॥ एतत्तीर्थवर स्नानात् ब्रह्मशा
पो विमोचितः ॥ तस्मादनेन तीर्थेन तुल्यंलोकेनविद्यते
॥८०॥ सर्वेषां प्रत्ययार्थंहि ब्रह्मशापाविमोचनं । अद्यप्राप्तं
त्वयाराजन्कृतकृत्योहमद्यवै ॥८१॥ इत्युदीरितवाक्यंतु
नटंस्पृष्ट्वाकरैर्नृपः ॥ उवाच वदतांश्रेष्ठो मृदुपूर्वं गुणो
त्तरं ॥ ८२ ॥ अनाथं कृपणं दीनं मांगृहीत्वा बलात्स्व
यं। अन्नपानादिकंदत्वा कृपयापर्यपालयः ॥८३॥ यस्माद्र
क्षितवान्स्त्वंमाम् तस्मात्पितृसमोमम।सर्वंहिविष्णुभक्तानां
कृपयालभ्यतेफलं ॥ ८४ ॥ साधंमयातुगंतव्यं मयिस्ने-
हान्नटोत्तम ॥ अंगीकृत्यतु द्वाक्यं देशेमत्पूर्विकास्थिते॥
८५॥ ततोनटस्तथेत्युक्त्वा राजानंशिबिकोपरि ॥ संस्थाप्य
निर्गतस्सर्वैः सहभृत्यैर्मुदान्वितः ॥८६॥ राजापिस्वपुरं-
प्राप्य सर्वान्कामानवाप्यच। भुंजानोमानुषान्भोगान् चि
रांज्यमकारयत् ॥८७॥ तेचसर्वेनटाःप्राप्ताः विष्णुलोकं
ऋषीश्वराः। पंकतामरसेतीर्थे स्नात्वानिर्धूतकल्मषाः ८८॥
तत्तीर्थेज्ञानतोवापि कृतादज्ञानतोपिवा॥स्नानात्पानाद्दर्श

नाञ्च स्पर्शना त्स्मरणादपि।८९।मुच्यते सर्वपापेभ्योमुक्तिं
दास्यंत्यपिध्रुवं ॥ तोताद्रिनाथनामानि कीर्तयंतो नराभु
वि ॥ ९० ॥ यत्रयत्र स्थितास्तेषां कीर्तनंचापिमुक्तिदं ॥
जना मृगाः पक्षिणश्च एतत्स्थलनिवासिनः ॥ ९१ ॥
तेषामपिहरेर्लोके वासस्त्वंते ऋषीश्वराः । रुद्रनामसहस्रा
च्च रामनामसहस्रकात् ॥९२॥ अन्येषामपिमन्त्राणां पठ-
नादप्यनारतं ॥तोताद्रिनामपठनं सकृदप्यतिरिच्यते॥९३
तोताद्रिनामपठन मेकवारं मुनीश्वराः ॥ श्रीमदष्टाक्ष-
रीमन्त्र तुल्य मेवनसंशयः ॥९४॥ सर्वतीर्थेषु विधिवत्स्ना
न पान जपार्चनं॥ तत्कोटिगुणितंपुण्यं तोताद्रिस्मरणाल्ल
भेत् ॥९५॥ तत्स्थले दानहोमंच पूजा तर्पण मेवच॥क्षे
त्रोपवासः क्षौरंच श्राद्धपिंडं विशेषतः ॥९६॥ तस्माद्रुद्रो
पि तत्क्षेत्रे वासंकर्तुंस्वभक्तितः॥नागलोकाद्विनिष्क्रम्यत
त्रतिष्ठति नित्यदा ॥९७॥ चतुर्मुखोपि देवाश्च नारायण
मनामयं॥दृष्ट्वातुतस्यमंत्रंच जपन्तोमोक्षमिच्छवः॥९८॥
तस्यावतारसंभूत मूर्तिनाभुविपालिताः॥वराहः कच्छपो
नन्तः सहस्रफणसंयुतः ॥९९॥ वहंतःसर्वलोकांस्ते रक्ष
न्तिमुनिपुंगवाः॥तन्मयावर्णितुंलोके कोटिकालस्थितेनच
॥१००॥ वक्तुंश्रोतुमशक्यंहि विष्णोश्चारित्रमुत्तमम्॥तथा
पित्वक्ष्ये यत्किंचित् ज्ञातव्यं मुनिपुंगवाः॥१०१॥धरण्याः

चार्थितोदेवो महिष्या शुद्धिकाम्यया ॥ यथाहरिः स्थित
पूर्वेवैकुण्ठे कुंठविक्रमः ॥१०३॥ तद्रूप मद्भुताकारं दुर्दर्श
मपिवेधसः॥दर्शयामास तोताद्रौ भूमेःकमललोचनः॥१०४
इतिश्रीब्रह्माण्डपुराणे क्षेत्रवैभवखंडेतोताद्रिमहात्म्ये द्वि
तियोध्यायःसमाप्तम्॥

तृतीयोध्यायः प्रारम्भम्

श्रीमतेरामानुजायनमः

श्रुत्वेदंशौनकस्सूतंप्रपच्छाशुद्धिकारणं॥शौनकउवाच॥महि
षी माधवस्यैषा भूतधात्री विशेषतः ॥१॥ अशुद्धत्वं कु
तःप्राप्ता कुतोस्याश्शुद्धिकामता॥ श्रुत्वाशौनकवाक्यंतु सू
तः पौराणिकाग्रणीः ॥२॥ कथाम कथयत्पुण्यां वैष्णवीं
कल्मषापहां॥ क्षीराब्धौतु पुराविष्णुः शेषतल्पे श्रियःपतिः
॥३॥ योगनिद्रावशःकाले लोकान् स्रष्टुंव्यचिन्तयत् ॥ त-
त्क्षणात्तस्यनाभौतुपद्मम् दिव्यमभूद्वरं ॥४॥ भानु रश्मिचि
तंतप्त हाटकच्छायमूर्जितं॥सहस्रदलसंयुक्तं केसरैरुपशोभि
तं ॥५॥ दिव्यगंधै र्दिशस्सर्वा पूरयत्सर्वशोभनं॥आविर्बभु
वकृपया हरेस्तस्मिंश्चतुर्मुखः ॥६॥ अक्षमालांकरेबिभ्र त्पु
स्तकंच कमण्डलुं ॥यज्ञोपवीतं दंडंच दिव्यरूपो व्यराज
त ॥७॥ एवंजातः पद्मयोनि रहंब्रह्मेतिगर्वितः ॥तद्गर्वश

मनार्थाय हरीःकर्णमलेनसः ॥८॥ मधुकैटभनामानौ वस्तु
जन्राक्षसोत्तमौ ॥ तौवीरौ कमलोत्पन्नं संहर्तुं नौसमुद्यतौ
॥९॥ पद्मनाभस्य मार्गेणब्रह्मा भीतः पलायितः ॥पलाय
मानं नालेस्मिन् द्रुतंतंच पितामहं ॥ १० ॥ उवाच
भगवान् सद्योमत्स्यरुपीजनार्दनः॥हेब्रह्मलरोदिषित्वंकिमहं
रक्षामिसत्वदा ॥११॥ येनागतंतु मार्गेण गच्छपद्मदृढा
सने॥स्थीयता मित्युवाचेदं श्रुत्वा ब्रह्मा यथास्थितः॥१२॥
पद्ममध्ये स्थितस्तोपि चिन्तयन् किमिदंत्विति॥तदाना
रायणःकर्णे हंसरूपीजनार्दनः ॥१३॥ त्वयाज्ञात स्तवपि
ता हरिरित्येव मब्रवीत्॥ततःपितामहःश्रुत्वा हरिमंत्रंजप
न्स्थितः॥१४॥ बहुकालं ततःपश्चा द्धयग्रीवो भवद्धरिः॥
वैदिकंपीठमारुह्य तस्याग्रेस्थितवान्गुरुः ॥१५॥ प्रणवं
ह्युपदिश्याथ तिरोधानंगतोहरिः॥पश्चात्प्रणवसंयुक्तंहरीरो
मितितंजपं ॥१६॥ कृत्वासबहुकालेन भूर्भूवस्वरोमिति॥
हृदयजानितं मंत्रं किमिदंन्विितिचिन्तयन् ॥१७॥ गुरुभ
क्तियुतो ब्रह्मा जपंस्तुकमलेस्थितः॥तत्कालेशेषतल्पात्तु
त्थितो भगवान्हरिः ॥१८॥ तंदृष्ट्वामेघसंकाशं भगवंतम
धोक्षजं॥ कोसावितिसमालोक्य विस्मयापूर्णलोचनौ॥१९
मेघगंभीरयावाचा ऊचतुर्मधुकैटभौ॥ कोवात्वंकुतआयातः
कोदेशः कश्चतेपिता ॥ २० ॥ किमागमनकृत्यंते

ब्रूहीतिमदमोहितौ ॥ ततोजगत्पतिःसर्वं श्रुत्वावाक्यं म
दांधयोः॥२१॥ प्रत्युवाच मुनिश्रेष्ठाः सर्वलोकेश्वरोहरिः॥
अच्युतोहं मनन्तोहं नारायण इतिश्रुतः ॥ २२ ॥ अहमे
को जगत्कर्ता रक्षामिसकलाःप्रजाः ॥ अनादिनिधनोवि
ष्णुः परमात्मेतिकथ्यते ॥ २३ ॥ सृष्टि स्थिति विनाशा
नां कर्ताहं कारणंविना ॥ अन्येषां कृतिसामर्थ्यं नहिलो
केषुविद्यते ॥ २४ ॥ अजान न्निहपृच्छामि कौयुवां ब्रूतत
त्वतः॥मुष्टिभि र्जानुभिः पद्भि रन्योन्यं समताडयन्॥२५
ऊरौस्संताड्यगर्जंतौबाहुभिर्बाधितौमुहुः॥ पादेनदृढबद्धेनमु
ष्टिनान्योन्यकोपिनः ॥२६॥ मधुश्च कैटभश्चैव दुरात्मानौ
मुनीश्वराः॥सचनारायणः श्रीमान् द्वंद्वयुद्धं सुदारुणं॥२७
पंचवर्षसहस्राणि चाक्रिरेतमहाबलाः ॥ मधुकैटभनामानौ
ततस्तौबलशालिनौ ॥२८॥ क्रोधरक्तेक्षणोहन्तुं चिंतया
मासवैहरिः॥मच्छरीरमलावेतौ राक्षसौगार्वितौभृशं॥२९॥
अनेनोपायमात्रेणहनिष्यामीतिनिश्चयात्॥वाणीमाज्ञापया
मास तद्वक्रेस्थीयतामिति ॥३०॥ तथाकरोत्सादेवी तौ
चौभौमधुकैटभौ ॥ अग्रेस्थितौ महावीर्य्यौ घोररूपौ महा
बलौ ॥३१॥ उवाच भगवान्प्रीतौ बलेमत्सदृशौयु
वां॥दास्यामिचवरान्प्रीत्या युवयोर्मनसोप्सितान् ॥३२ ॥
वृणीध्व मितियाचंतं दीनवत्पूर्वभाषिणं ॥ संवीक्ष्यविष्णु

मग्रेतु कोपसंरक्तलोचनौ ॥३३॥ हतौनावूचतुर्विष्णुं त्व
मेवशरणंव्रज ॥ वांछितार्थं प्रदास्याव स्त्वंवृणीष्ववरंस्वयं
॥३४॥ यदूचतुर्वृणीष्वेति राक्षसौततक्षणाद्धरिः ॥ तथैव
भवतामद्य संहृत्य मधुकैटभौ ॥३५। तन्नामलब्धुकामोह
मेतद्वर मयाचत । परस्परमवेक्ष्याथ चिन्तयानावुभौमिथः
॥३६॥ जलहीने स्थलेदेव संहारश्चेत्कुरुयदा॥मधुकैटभहं
तेति नामप्राप्यंत्वयातथा ॥३७॥ इतिदत्वावरंमूढौ हरे
रधिकवत्स्थितौ ॥ इतिताभ्यां वरंप्राप्य प्रसन्नो भगवान्
हरिः॥३८॥ स्वोरौमेरु समाकारे संस्थाप्या वंतरगणतौ॥अ
सुरौ क्रूरकर्माणौ ममर्दासुरमर्दनः॥३९॥निहत्यतौ महाबाहु
र्ब्रह्माण मकुतोभयं । कृत्वाच भगवान् ब्रह्मन् सृजस्वत्या
ह वैजगत् ॥ ४०॥ मदाज्ञया वेदवाक्य क्रमंच परिकल्पय
॥ इतिब्रह्माण माज्ञप्य तत्रैवांतर्दधेहरिः ॥४१॥ ततोभि
दुःखिताभूमि मधुकैटभमेदसा ॥ शोणितै रस्थिभि र्व्या
प्ता तपसातोषयद्धरिं ॥ ४२ ॥ महेन्द्रस्यगिरेःपार्श्वे तोता
द्रौपुण्यवर्धने ॥ कृत्वाश्रमपदंदेवी पावनाय वसुंधरा ॥
४३ ॥ तपसा तोषयामीति हरिंयत्नपराभवत् ॥ पंकता
मरसेतीर्थे स्नात्वापंचाग्निमध्यतः ॥ ४४ ॥ स्थित्वा हरिं
हृदिध्यात्वा निरुच्छ्वासा निरुद्यमा ॥ निराहारा कुंभकेन
युक्तायोगेन साचिरं ॥ ४५ ॥ हेमन्तेजलमध्येतु विगाह्य

जलजन्तुवत् ॥ स्थित्वातदनुमादेवी पादेनैकेन निष्ठिता ॥ ४६ ॥ ध्यानारूढास्थिता तस्मिन् कालेसर्वगनःप्रभुः ॥ अदृष्ट्वा वामपार्श्वस्थां मेदिनीं चिंतयन्हरिः ॥ ४७ ॥ मधुकैटभनामानौमयातौ निहतौकिल॥तयोर्मेदो स्त्रिभिः स्पृष्टा साशुद्धाति पुनःपुनः ॥४८॥ शंखचक्रगदापाणिर्वि चार्यमनसाहरिः ॥ आत्मानमेवध्यायंतीं महेंद्रस्य समीपगां ॥ ४९ ॥ आरुह्यविहगाधीश माविरासी त्तदाहरिः ॥ अग्रेतस्या स्तपास्विन्याः कोटिसूर्यो दयोज्वलः ॥५० ॥ केयूर हार कटक किरीट वलयांगदैः॥ भूषितो दिव्य रूपेण दृश्यपीतांबरोहरिः ॥ ५१॥ श्रीवत्सः कौत्सुभो द्भासी वनमाला विभूषितः । तदामोद भ्रमद्भृंगै झंकारि तदिगंतरः ॥ ५२ ॥ स्तूयमानो मुनिगणैः सनकाद्यैश्च योगिभिः॥ ब्रह्मेशाद्या न्सुरान्सर्वा न्संवीक्ष्य नयनांचलैः ॥५३॥ तांदृष्ट्वालंकृतांपूर्वंभूषणैर्भूषितोमहीं ॥उवाच मधुरै र्वाक्यैः सांत्वय न्मधुसूदनः ॥ ५४ ॥ हेबाले तपसा देहं कुरुषेकिं कृशंतव ॥ मृद्वी भि रंगुलीभिस्त्व माहरंती सामरकुशान् ॥ ५५ ॥ किमर्थं कवरीभार स्तवदेविजटाः कृताः ॥ कौशेयानिपरित्यज्य वल्कलानि दधासिकिं ॥ ५६ ॥ मुक्ताहारंचसुभगे पद्मबीजांचितांस्त्रजं ॥ राजत्कांचनपर्यंके वरास्तरणशोभिने ॥ ५७ ॥ मालतीकुसुमाकी

र्णे शयित्वाशयनोत्तमे ॥ तद्विस्मृत्य वनेभूमौ शयेदर्भैः किमास्तृते ॥५८॥ दिव्यवीणादिकंवृद्य तत्र तालानुगांध तः॥ गायंतीमततंत्वद्य कीर्तनंक्रियतेत्वया ॥ ५९ ॥ कर्पू रगलिकामिश्रं तांबुलं स्वीकृतंत्वया ॥ तुलसीभक्षणंत्व द्य किमर्थं क्रियतेत्महि ॥ ६० ॥ एवंबहुविधंवाक्यं विन येरुपशोभितं ॥ उत्कास जगतांनेता दृष्टानांतु मुमोहह॥ ६१ ॥ ततःपरं मही कांता तूर्णमुत्थाय सुन्दरी ॥ दंडव त्पतिताभूमौ नमस्कृत्वा पुनःपुनः ॥ ६२ ॥ आसने ना र्घ्यपाद्याभ्यां गंधपुष्पाक्षतैरपि ॥ पूजीयत्वा जगन्नाथं पू रिता पुलकोद्गमैः ॥ ६३ ॥ आनन्दाश्रु परीताक्षी हरि भक्ति सम कुला ॥ ध्यायंती स्तोत्रयामास स्तोकोन्मी लितलोचना ॥ ६४ ॥ शिरस्यंजलि मादाय जपमालां करेचसा ॥ मह्युवाच ॥ ओंनमः परमानन्दा ह्यनन्त गुणशेवधे ॥६५ ॥ कारणातीतरूपाय नमस्तेपरमात्मने॥ अणोरणीयसेऽनन्त रूपिणे सर्वशेषिणे ॥ ६६ ॥ परस्ता त्प्रकृते तुभ्यं नमस्तेपुरुषोत्तम ॥ शंखचक्रगदाखड्ग चा पाब्जवरधारिणे ॥ ६७ ॥ सर्वलोकात्मरक्षार्थ माश्रितानां विशेषतः ॥ सृष्टि स्थिति विनाशानां कर्वेकारणमूर्तये ॥ ६८ ॥ अनन्तकोटि ब्रह्माण्डा न्यखिला न्यतेस्वयं ॥ कटाक्षलेशमात्रेण सर्वकामार्थदायिने ॥ ६९॥ नमोनमः

कला काष्टा रूपकालात्मनेनमः ॥ परमार्थस्वरूपाय पं
चोपनिषदात्मने ॥ ७० ॥ ऋग्यजुस्सामरूपाय तपसांफ
लदायिने ॥ साक्षिणेसर्वकृत्यानां तेजसांराशयेनमः ॥
७१ ॥ निर्गुणाय नमस्तुभ्यं गुणानां निधयेनमः ॥ नमो
निर्मलरूपाय निर्विकारायतेनमः ॥ ७२ ॥ पाहिमांपरम
शान भक्तवात्सल्यवारिधे ॥ कृपयादेवदेवानां दुरितक्षय
कारक ॥७३॥ देवनाथ नमामित्वां पाहिमांकृपयातव ॥
एवंबहुविधै स्तोत्रै स्तुत्वा प्रीतिपुरस्सरं ॥ ७४ ॥ कृत्वा
चपरयाभक्त्या भूयोभूयो नमस्क्रियां ॥ आनंदाश्रुपरीता
क्षी तस्थौपृथ्वी हरेःपुरः ॥ ७५ ॥ श्रुत्वाहरिस्तत्स्तोत्रं
पृथ्व्या स्तस्याः श्रियपतिः । उवाचभगवांस्तत्र स्निग्ध
गंभीरयागिरा ॥ ७६ ॥ त्वयाकृतेन स्तोत्रेण देविसर्वस
हेमम ॥ संजाताप्रीतिरतुला श्रवणानंदवर्षिणा ॥७७॥
वर्ततेहृदयेयत्ते तत्सर्वंचददाम्यहं । इत्युक्ता पतिना नंता
प्रणम्य प्रियमाहच । ७८ ॥ श्रीभूमिरुवाच ॥ अशुचि
श्चास्मिदेवेश दैत्यमेदोस्थिशोणितैः॥ त्वंनाथपुण्डरीकाक्ष
पूतिगंधंचदुस्सहं ॥ ७९ ॥ अशुचित्वंचदेवेश नुदत्वंसर्व
कामद ॥ मयिस्थितैः कृतानीह यज्ञदान तपांसिच ॥
८० ॥ भवंतु सफलान्येव सर्वतीर्थानिचप्रभो ॥ संन्निध
त्स्वस्वयंचात्र शिरस्थाने ममाच्युत ॥८१ ॥ तोताद्रौ स

वैजंतूनां भुक्तिमुक्ति प्रदस्सदा ॥ एतदाकर्ण्य वचनं ध
रण्याः प्राहकेशवः॥८२ ॥श्रीभगवानुवाच ॥ मत्कटाक्षा
मृतरसैः प्लाविता सिवसुंधरे ॥ पावना नित्यपूताच संश
योप्येतुमानसात् ॥८३॥ मेदिनीतिचतेनाम्ना कर्मणैवभवि
ष्याति ॥ धर्मार्थ काममोक्षार्थं कर्मकुर्वन्तियेनराः॥ ८४॥
त्वयिस्थिता वरारोहे तेषांदास्यामितत्फलं॥त्वय्येवसिंधवो
द्वीपाः पुण्यानद्य स्सरांसिच॥८५॥ पुष्करिण्यो थकूपाश्च
वाप्यःसर्वफलप्रदाः ॥ भवन्तु कुलगोत्रश्च तेषुसर्वेषुसर्वदा॥
८६॥मामुपास्ययदाकाले भक्ताःकुर्वंतियेतपः॥तवदेहे स्थि
तास्तेषां दास्यामि फलमक्षयं॥८७॥चराचराणांसर्वेषामुत्प
त्तिस्त्वयिशोभने॥ सर्वौषधीनां रत्नाना मुत्पत्तिश्च भविष्य
ति ॥८८॥ श्रीवैकुण्ठ विमानेस्मिन् पंचोपनिषदात्मके ॥
शुद्धसत्वमये दिव्ये पूर्णषाडू गुण्यविग्रहः ॥ ८९ ॥ आ
सीनो नागपर्यंके श्रिया भूम्या त्वयासह ॥ परमव्योमधा
माहं वृतःपक्षीश्वरादिभिः ॥ ९० ॥ संनिधानं करिष्या
मि ब्रह्मणो दिवसावधि ॥ तोताद्रौ रात्रिसमये वैकुण्ठं
सूरिसेवितं ॥ ९१ ॥ तत्रमाहात्म्य सदृशं नास्ति कोके
षु कुत्रचित् ॥ यद्यत्प्रार्थयसेकाम्यं सर्वदास्यामि सुन्दरी
॥ ९२ ॥ वसकल्याणि मत्पार्श्वेयथाश्रीरनपायिनी ॥ त
पसो विरमाद्यत्वं इत्याह भगवान् हरिः ॥ ९३ ॥ इति
संप्रार्थितोदेव्या भूम्या कारुण्यवारिधिः ॥ संतोषेणा द

दारसर्वं तस्यैश्रीवल्लभोहरिः ॥ ९४ ॥ ततस्संतुष्ट हृदया तपोवेषं विसृज्यसा ॥ हरिद्रा कुंकुम रसा नवलिप्य स रांजले ॥ ९५ ॥ स्नात्वा दिव्यांबरंधृत्वा भूषणानि यथे प्सितं ॥ अलंकारेण संयुक्ता दिव्येनैव वसुन्धरा ॥ ९६ ॥ नमस्कृत्वा हरिंतूर्णं पार्श्वेतस्थौ मुदान्विता सचसर्वेश्वरःश्रीमानागतां तामलंकृतां॥९७ अंकेनिधाय व सुधां समालिंग्ये प्सितोहरिः ॥ तदाप्रभृति भूम्या च श्रियाचसनकादिभिः।९८।स्तूयमानोहि राजावै वैकुण्ठे तु यथास्थितः ॥ तथाजगामतोताद्रिं कुर्वन् भूमेःप्रियं हरिः ॥९९॥ येद्रक्ष्यंति नराविष्णुं श्रीमत्तोदाद्रि नायकं ॥ श्रीवैकुण्ठविमानस्थं परिवारसमन्वितं ॥१००॥ शृण वंतीमाम् कथांदिव्यां भूमेःकल्मषनाशिनीं ॥ सर्वकल्मष मुक्तास्ते पावनायांतितत्पदं ॥१०१॥ यस्माद्व्याप्ता वसु मती मधुकैटभ मेदसा ॥ मेदनीतिततोलोके ख्यातागिरि वरात्मजे ॥१०२॥ निष्कलो निर्मल श्शांतो निर्विकारो निरंजनः ॥ सकलोह्यदभूल्लोका न्रक्षितुं श्रीमहीपतिः ॥ १०३॥ मयाशक्तेनविष्णोश्च महिमावण्यतेकथं ॥अशक्य मपि यत्किंचित् जानतातेमयोदितं ॥१०४॥ इतिश्रीब्र ह्माण्डपुराणेक्षत्रैभवखंडे तोदाद्रिमाहात्म्येतृतीयोध्यायः ॥तृतीयोध्यायः समाप्तम्॥

चतुर्थोध्यायः प्रारम्भम्

श्रीमतेरामानुजायनमः

श्रीशौनक उवाच॥ सर्वज्ञ तत्वविच्छ्रेष्ठ सूतपौराणिकोत्त
म॥ एतत्कथामृतंभूयः श्रोतुंकौतुहलंहिमे॥१॥श्रीसूतउवा
च॥ पुरा परीक्षिन्नृपतेः शुकेन हरिसत्कथां॥ श्रुत्वा
लोकोपकारार्थं तृषितंनाभ्यगमन्मुने॥२॥ शुकोपि वक्तुं
नाशक्तो वर्णितुं हरिसत्कथां॥तस्मादहं कथांविष्णो र्वक्तुं
शक्तः कथंतव॥३॥ तथापि वक्ष्ये कृपया महतां श्रृणुत
त्कथां॥ पूर्वपुण्य विपाकेन लब्धा सत्संगतिर्मया॥४॥
सर्वज्ञोपि शिवःपूर्वं तोताद्रिस्थल वैभवं॥पृष्टोगिरिजया
शक्तः तस्य सर्वस्य वर्णने॥५॥ पार्वतींप्रति यत्किंचित्
प्रोक्तवान् समहेश्वरः॥ तत्कथांहिहरेःप्रीत्यै वक्ष्येव्यासो
पदेशतः॥६॥ प्रसादाच्च श्रियोर्भर्तु स्सावधानमनाः श्रृणु॥
शिवोउवाच॥श्रृणुदेवि प्रवक्ष्यामि तोताद्रौपुण्यवर्धनं॥७॥
अन्येषां योग्यतानास्ति हरिभक्ता न्विनाभुवि॥श्रोतुंव्रता
नां सर्वेषां निरालव्रतमुत्तमम्॥८॥ प्रातःकाले शुचिर्भूत्वा
स्नात्वाविष्णुं विचिंतयन्॥स्वकर्माणिच कृत्वाथो गेहेगत्वा
शुचिव्रतः॥९॥दिव्यान्न भक्ष्यभोज्यानि फलानिविवीधानि
च॥दध्याज्यंच मधुक्षीरंशर्करा इशीतलंपयः॥१०॥ताम्बूलं
चंदनंसम्यक्कर्पूरं कुंकमंतथा॥कस्तूरी पटवासंच मल्लिकाकुसु
मानिच॥११॥चंपकानिच मुख्यानि भक्तियुक्तो विचक्षणः

विष्णुभक्ताय दातव्यं दक्षिणासहितंशुचि ॥१२॥ दत्वा सर्वं यथाशक्ति कृत्वातस्मैनमस्क्रियां॥ भक्त्यातोताद्रिना थाये त्युक्त्वा श्रीवैष्णवंततः ॥१३॥ संप्रेष्यच ततस्सर्वै र्बंधुभिः परिवारितः भुक्त्वाशेषं कृतार्थस्स न्परिपूर्णम नोरथः ॥१४॥ दशम्या मेककालंच पश्चादेकादशीदिने॥ शुद्धोपवास मथवा आपोमूलं घृतंपयः ॥ १५ ॥ हविष्यं ब्राह्मणार्थंच गुरोर्वाक्यंच भेषजं ॥एवमादि व्रतंकृत्वा स्मर न्तोताद्रिनायकं ॥१६॥ रात्रौ वराहप्रतिमाम् सौवर्णां रा जतांमपि ॥ कृत्वाकुंभं शुचौदेशे स्थंडिले तंडुलान्विते ॥ १७॥निक्षिप्य वस्त्ररम्याणि नालिकेरेण संयुतं ॥चूतपल्लव संयुक्तं गंधमाल्यै रलंकृतं ॥ १८॥ अष्टौधान्यानि विधि द्विनिक्षिप्या भितोदृढं॥ आचार्यं ऋत्विजश्चैव पूजयित्वो पचारतः ॥ १९॥ ततःकुंभे समावाह्य तोताद्रिश्वर मव्य यं॥ ऋत्विग्भि स्सहितोविद्वान् पूजयित्वा यथाविधि ॥ २०॥ ध्याना सनार्घ्य पाद्यादि वस्त्रै गंधैश्च भूषणैः॥ धूपै र्दीपैश्च नैवेद्यै र्माला नीरांजनादिभिः ॥२१॥ मंत्रपुष्पै स्समभ्यर्च्य विष्णोर्नामसहस्रकैः ॥ एवंकृत्वा चतुर्याम पू जां जागरणंपुनः ॥ २२ ॥ द्वादश्यां पूजयित्वात माचार्यं ऋत्विजः क्रमात् ॥ संपूज्य भूषणै र्वस्त्रै र्गंध माल्यैः स दक्षिणैः॥ २३ ॥ प्रतिमां पूजितां तांवै पूजोपकरणै स्स मं ॥ तांबूल सहितं दत्वा विष्णुभक्ताय भक्तितः॥२४॥

पश्चातु पारणं कृत्वा पूराण श्रवणंहरेः ॥ एवं तोदाद्रि
नाथस्य प्रीतये कुरुतेनरः ॥ २५॥ सोऽश्नुते सर्वकामांश्च
विष्णुलोकं चगच्छति॥ स्वर्णपात्रे जलंपूर्य वस्त्रणावेष्टच
दक्षिणां॥२६॥ योदद्या द्विष्णुभक्ताय सपरंपद माप्नुयात्
धान्यतंडुल गोधूम गुड तैल घटानिच ॥२७॥ आज्यं व
स्त्रयुगं धेनुमन्नदानं विशेषतः ॥ यस्तुतोदाद्रिनाथस्य वि
मानस्यसमीपतः ॥२८॥ दक्षिणासहितं दद्या द्विष्णुलोके
महीयते ॥ तद्दान सदृशं दान मन्यक्षेत्रेषु दुर्लभं॥२९॥
तोताद्रिस्थल संस्थानां द्विजाना मुपचारतः ॥यथाशक्ति
प्रदानंहि तत्कोटि गुणितं भवेत् ॥३०॥ षोडशानि वरा
रोहे महादानानिं योनृपः ॥ वाजपेयादिकंयज्ञमश्वमेधाव
सानकं ॥३१॥ तोदाद्रौ यस्तुकुर्वाण स्सोनन्त फलभाग्भ
वेत् ॥ महापातकयुक्तोपि तोदाद्रिस्थल वैभवात् ॥३२॥
तत्स्थलेक्षणवासेन निष्पापो भवतिध्रुवं ॥ मनोवाक्कायपू
र्वाणि कृत्वापापानि कुत्रचित् ॥३३॥ तत्स्थलावासमात्रे
ण मुच्यतेसर्वपापतः ॥ भक्तिपूर्वं द्विजस्तत्र गायत्रीं शु
द्धचेतसा ॥३४॥ सहस्रं प्रजपेद्विद्वान् गायत्रीसिद्धिमेष्य
ति ॥अष्टाक्षरं योजपति मन्त्राणामुत्तमोत्तमं॥३५॥भूमौभो
गान्यथाकामम् स्त्वंतेविष्णुमाप्नुयात्॥ ममपञ्चाक्षरं दे
वि मंत्रानन्यांश्च वाजपेत्॥३६॥तत्स्थलं जपमात्रेण पुरश्चर्या
पि सिध्यति ॥ एवंसर्वे जपास्तत्र सिध्यंती ष्टार्थदायिनः

॥३७॥ स्वयंजप्तु मशक्तोयो विष्णुभक्तान्द्विजोत्तमान्॥ समाहूय पुनस्तेभ्यो वस्त्रभोजन दक्षिणाः ॥३८॥ दत्वा जपं कारयति विष्णुलोकं सगच्छति ॥ नवग्रहजपं होमं दानं ब्राह्मणभोजनं ॥३९॥ तत्स्थले कुर्वतां नृणां ग्रहपिडा नाविद्यते ॥ बानाचलेशितुर्भक्त स्त्वाभिषेकार्थं मादरात् ॥४०॥ तिलान्सं शोध्य संक्षाल्य तैलं शुद्धनवेघटे॥ गृहीत्वा पिष्टसंयुक्तं कीटैश्चापि विवर्जितं ॥४१॥ कदली चूत पनस कापित्थ फलसंयुतं ॥ द्राक्षा जंबीरकंचैव इक्षु कान्डरसान् बहून्॥४२॥नालिकेरोदकान्या ज्यंदधि क्षीर कुशोदकं ॥ दिव्यचंदन कस्तुरी कर्पूर क्षोदसंयुतं ॥४३॥ एवमाद्यभिषेकार्थं भक्तयादद्या दनन्यधीः ॥ ततोदिव्यां बररत्न भूषणं हारकुंडलं ॥४४॥ केयूर कटके दिव्य कंकणं कटिसूत्रकं ॥ मंजीर कटकाद्यानि भूषणानि समर्पयेत् ॥४५॥ दिव्यान्नं दधिसंयुक्तं सूपामिश्रं तिलोदनं ॥ सर्षपान्नं मरीच्यान्नं हिंगुजीरकसंयुतं॥४६॥तिंत्रिणीरसयुक्तान्नं गुलान्नं शुद्धमोदनं ॥ अपूपादीनि भक्ष्याणि लेह्यानि विविधानिच ॥४७॥ दधि क्षीरंच पानीयं पानकंच रसायनं॥ कर्पूर चूर्णसंयुक्तं तांबूलं दीपमालिकाः ॥४८॥ वितानानि विचित्राणि सम्य ग्यवानिका अपि ॥ दिव्यासिंहासनं यानं वाहनानि प्रथक् प्रथक् ॥४९॥ शिबिकां दोलिकाश्चैव माद्यान्यस्तु समर्पयेत्॥ स

पुमान् पुत्रपौत्रैश्च वैकुंण्ठं प्राप्स्यतिध्रुवं ॥५०॥ प्राकार
गोपुराट्टाल मंडपांश्च विशेषतः॥ शिखरस्या भिषेकंच नि
त्योत्सव महोत्सवौः ॥५१॥ मासोत्सवं पवित्रंच डोलो
त्सव रथोत्सवौ ॥ अन्यानप्युत्सवान्सर्वा न्कुरुते योविशे
षतः ॥५२॥ सोपिवैकुंठलोकस्थैः पूज्यते सूरिभिस्सदा॥
अश्वत्थं पिचुमंदंच तिंत्रिणी पनसाम्रकौ ॥५३॥ कपित्थ
बिल्वा मलक नालिकेराश्च पाटलीः ॥ अशोक पूग पुन्ना
ग मंदारा श्चंपकद्रुमाः॥५४॥द्राक्षा खर्जूरबकुल कदंब निचु
लानिच ॥ जंबीर मातुलं गाश्च लवंगा स्तिलकास्तथा
॥५५॥ एवमादिभि राकीर्णं कृत्वोद्यानं समर्पयेत् ॥ दे
वनाथस्य सपुमान् विष्णोस्सायुज्य मश्नुते ॥ ५६ ॥ मल्लि
काः करवीराश्च कुरवो मरवस्तथा ॥ तुलसी जाति कर्पूर
मल्लिका कमलानिच ॥५७॥ कल्हारो त्पल केतक्य श्चंप
काश्चैव मादिभिः ॥ पुष्पै र्विरचितां मालां तोदाद्रीशाय
नित्यतः ॥५८॥ समर्पयतियोमर्त्य स्सवैवैकुण्ठभाग्भवेत्
॥ तत्स्थले धर्म कर्माणि कुर्वंतो बहुमानवाः ॥ ५९ ॥
सालोक्यं प्राप्यतद्विष्णो रमृतत्वं भजंतिहि ॥ इतिमुनि
वरवृंदै स्तूयमान स्ससूतो गिरिवरतनुजायै भाषितं शं
भुनेति ॥ अगणितमहिमाब्धे रादितोताद्रिनेतु र्निखिल
मतिशयंतं प्रोक्तवानुत्तमोसौ ॥६०॥ इतिश्रीब्रह्माराडपु
राणेक्षेत्रवैभवखण्डेउमामहेश्वरसंवादे तोदाद्रिस्थलधर्म
कथनं नामचतुर्थोध्यायः ॥ ॥

पंचमोध्याय प्रारंभम्

श्रीमतेरामानुजायनमः॥ एवमुक्तां शिवेनाथ श्रुत्वागौरीहरेःकथां॥ अतृप्तमनसा शंभुं याचंती पुनरब्रवीत् ॥१॥ कदालक्ष्मीस्तपस्तेपे किमर्थं कुत्रवाप्रभो॥श्रेयोमूर्तिर्हि सातस्य नानवाप्तिर्हिदृश्यते ॥२॥ तत्कथां श्रोतुमिच्छामि वदगंगाधरप्रभो ॥ श्रीसूतउवाच॥ एवमभ्यर्थितश्शंभु रुमयातीवपावनीम् ॥३॥ कथांक्षीराब्धीकन्यायाः रहस्यामप्यवर्णयत्॥शिवउवाच॥श्रृणुदेवि प्रवक्ष्यामि रहस्यं सत्कथामृतं ॥४॥ श्रीनिवासस्य महात्म्यं पावनं भुवनत्रये॥उक्तांश्रुत्वाच तद्भक्तो विष्णुलोकेमहीयते ॥५॥ प्रथमोविष्णुभक्तानां भक्ताहमचलात्मजे ॥ कथामृतं हरेःपुंसां मवाङ्मनसगोचरं॥६॥ श्रवणात् कीर्तनात् पुंसां पापसंदोहनाशनं॥ मुनीनां योगिनांचैव देवाना मापिदुर्लभं ॥७॥ तथापिवक्ष्येतद्विष्णो श्चरितंपरमाद्भूतं॥रक्षार्थं सर्वलोकानांश्रुणुदेवीसमाहिता॥८॥पुरासंवर्तकस्यांतेलक्ष्मीर्विष्णवनपायिनी लोकसृष्ट्यां प्रवृत्तस्य दायितस्यस्वकस्यवै॥९॥लीलार्थेष्ववतारेषुसर्वेषु सहधर्मिणी॥सर्वात्मनां सुखावाप्त्यै क्लेशमुक्त्यैकृतागसां॥१०॥उपायभूतानित्यंच भवेयमिति चिंतया॥निश्चित्यचतपस्तीव्रं करिष्यामीति भूतले॥११॥ततसा पूर्विकाभूत्वास्वयंस्वयाः स्वशक्तितः ॥ चोदयामास तांप्रीत्यातपश्चरणकारणात्॥१२॥ अष्टाक्षरोपदेशंच कर्णमूलेचकारसा

कुंभकोणे महाक्षेत्रे पद्मपुष्करिणीतटे ॥ १३ ॥ तपःकुरु
हरेःप्राप्तु मुपायस्त्वंहि वांछितं ॥ गछतत्र तपःकर्तुं वा
लेभक्तिपुरस्सरं ॥१४॥ तथेति तांनमस्कृत्य पद्मपुष्करणी
तटे ॥ गत्वा लक्ष्मी मुनीन्वृद्धान् ब्राह्मणान भिवाद्यच
॥१५॥ पुष्करिण्या स्तटेपूर्वे पर्णशालां चकारसा ॥ त
ताम्निषवणस्नानं कृत्वावल्कल धाराणी ॥ १६॥ पश्चात्कृ
च्छ्राणि सर्वाणि निर्वृत्य प्रीतिपूर्वकं ॥ चांद्रायणवृतंकृ
त्वा जपंत्य ष्टाक्षरं परं ॥१७॥ ततःपर्णाशनाभूत्वा जला
शनपराततः ॥ निराहारे णयोगेन नियमैश्च समाहित
॥१८॥ प्राणायामपरानित्यं परमानन्दरूपिणं ॥चक्रपाणिं
हरिंध्यात्वा मनसापूज्यसर्वदा॥१९॥ अष्टाक्षरपूरश्चर्यां कृ
त्वा तर्पणपूर्वकं होमं दानं तथानिष्टा मतिथीनांच पूजनं
॥२०॥ भोजनं ब्राह्मणानांच षड्रसै रुपशोभितं ॥ सूपं
दधि घृतं क्षीर मेवमादियुतंततः ॥ २१ ॥ चन्दनालेप
ताम्बूलं दक्षिणाभि स्समान्वितं ॥ दत्वा ऋषीणां सर्वेषां
तृप्तिंकृत्वाविशेषतः ॥२२॥ एवं प्रतिदिनं लक्ष्मी रकरो
त्तपमुत्तमम् ॥ उपायता मभिप्संती लोकरक्षणतत्परा२३
कारुण्यरूपिणी विष्णोः पद्मपुष्करिणीतटे ॥ तस्मि न्न
वत्सरे नन्तो गालवश्च द्विजोत्तमः ॥ २४ ॥ पिप्पलारण्य
केदेशे नानावृक्ष समाकुले ॥ पनसै र्नालिकेराम्रैः क्रमुकै
र्वेणु पाटलैः ॥२५॥ पुन्नाग वदरी बिल्वैः कपित्थै र्बकुलै

धवैः ॥ जम्बूभि र्नक्तमालैश्च कोविदारैः कदम्बकैः २६॥
किंशुकै शिंशुपाभिश्च वनै जंबूभिरावृतै ॥ वराहै र्मृग
सारङ्गै र्लुलायै र्वनगोवृषौः ॥२७॥ शार्दूलैः कलभैः सिं
हैः संचारितवनांतरै ॥ कूजितैः कोकिलानांच केकीनांच
मनोहरैः ॥२८॥मत्तभृंगनिनादैश्च संनादितदिगन्तरै ॥ ग
त्वा तस्मिन् वनोद्देशे पिप्य लारण्यनामके ॥ २९ ॥
अनन्तो गालवश्चैव चेरतुःपरमंतपः ॥ वायुभक्षौ निरा
हारौ कृशौत्वाकाशसंश्रयौ ॥ ३० ॥ मनसानिर्मलेनैव
ध्यात्वानारायणंसदा ॥ गालवस्तुमहातेजा स्तपोनिर्वृत्य
सात्विकः ॥ ३१॥ कृतकृत्यो मुनिश्रेष्ठो विष्णुपूजापरस्स
दा ॥ अग्निकार्याणि कुर्वाणः प्रत्यहं परमार्थधीः ॥ ३२॥
अष्टाक्षरजपासक्तो ह्यनन्यमनसाहरिं ॥ चिंतयन् कुंभके
नैव योगमार्गेण संस्थितः ॥ ३३ ॥ एतस्मि न्नन्तरेदेवि
भगवा नब्जलोचनः ॥ दयानिधिर्हरिः श्रीमान् अखि
लात्मा सनातनः ॥ ३४ ॥ अंतर्बहिश्च सर्वेषां व्याप्तो
नारायणो विभुः ॥ पञ्च युधानि बिभ्राणो रक्षार्थ मखि
लात्मनां ॥ ३५ ॥ कोटीसूर्य्य प्रकाशेन किरीटे नोपशो
भितः ॥ हारकेयूर कटक कटिसूत्रादि भूषणैः ॥ ३६ ॥
भूषितः प्रभयासर्वं हरिदंतर्विराजयन्॥तपोमय स्तपोराशि
स्तपोमूलं तपःफलं ॥ ३७ ॥ गालवस्याग्रतःश्रीमा ना
विरासी त्सतांगतिः ॥ कृपया गालवं सम्यक् दृष्ट्वास्पृ

वाचतंहरिः॥३८॥सुधामयमीदंवाक्य मुवाच मधुसूदनः॥
प्रीतोस्मि तपसानेन प्रसन्नोस्मि तवेप्सितं॥३९॥दास्यामि
वरमैयेव गालववृणुतादिति॥ श्रुत्वावाक्यं हरिंवीक्ष्य विस्म
योत्फुल्ललोचनः॥४०॥ उत्थायपादौ संस्पृश्य नमस्कृत्वा पु
नःपुनः ॥ ऋग्यजुस्सामरूपेण सूक्तेनोपनिषद्गिरा ॥४१॥
स्तोत्रै रनेकै स्तुत्वातं तोषयामास गालवः ।कृतार्थोस्मि
कृतार्थोस्मि हरेत्वद्दर्शनादिह ॥४२॥ अद्यमे सफलं जन्म
अद्यमे सफलं तपः ॥ अद्यमेसफला विद्या हरेःपादा वलो
कनात्॥४३॥अनन्तकोटि रुद्रास्त्वा मनन्तकमलासनाः॥
द्रष्टुकामा स्तथासर्वा स्तपःकुर्वंति देवताः ॥ ४४॥ तेषामपि
महायोगि न्दुर्लभं तवदर्शनं॥ त्वद्रूपं विश्वरूपंहि मयाद्रष्टुं न
शक्यते ॥४५॥ कृपावशा दागतोसि कर्तुंमे सफलंत पः।
इत्युवाच मुनिःश्रीमा नानन्दा मृतसागरे॥४६॥ निमग्नः
पुरतोवीक्ष्य स्तुत्वाथ पुरुषोत्तमम् ॥ प्रीतियुक्तः प्रसन्ना
त्मा तस्थौतत्रैव गालवः ॥४७॥ इतिस्तुवन्तं तंश्रीमानु
वाच भगवान्हरिः ॥ बहुकालं तपःकृत्वा कृशोसि मुनि
पुंगवः ॥ ४८ ॥ नजाने किर्म.इंपूर्वं मधुकैटभनामकौ ॥
मांजेतुं राक्षसौ दर्पात् युद्धायसमुपस्थितौ ॥ ४९ ॥ पञ्च
वर्षसहस्राणि ताभ्यांयुध्वा निरायुधः ॥ बाहुयुद्धेन तौह
त्वा पश्चा दत्रागतोमुने ॥ ५० ॥ कुंभकोणे महालक्ष्मीः
पद्मपुष्करिणीतटे ॥ तपसामा मुपास्तेसा हहर्ं हुमनाद्दह

॥५१॥ तवाभीष्ट वरंदातु मागतोस्मि मुनीश्वर ॥ दत्वा
थास्यामि तेभिष्टं वृणीष्व वरमीप्सितं ॥ ५२ ॥ एवंभ
गवतो वाक्यं श्रुत्वा समुनिपुंगवः ॥ उवाच भक्त्यासंतो
षा ॥ दिष्टंवरमयाचतः ॥ ५३ ॥ स्वामि न्ममप्रसन्नश्चेत्
कावेर्यादक्षिणेतटे ॥ इहैवस्थातुमिच्छामि युगान्तप्रलये
ष्वपि ॥५४॥ एतत्क्षेत्रं श्रियायुक्तं श्रीनिवासो भवान्य
तः ॥ तस्माल्लोके श्रीनिवास क्षेत्रमित्यभिधाभवेत् ॥५५
॥ एतत्क्षेत्रे निवसता मैश्वर्यं बहुलंभवेत् ॥ पुत्रपौत्र
समृद्धिश्च नदारिद्र्यभयंक्वचित् ॥५६॥ यद्यत्प्रार्थितमेतेषां
तत्सर्वं दातुमर्हसि ॥ इदंममवरं श्रीमदन्यद्विज्ञापितंशृणु॥
५७ ॥ ममाश्रमे नागलोका दनन्त स्सर्पराडिह ॥ तपश्च
रतिधर्मात्मा तस्याभीष्टं प्रयच्छच ॥५८॥ एवंमुनिवरेणो
क्तं वरंतस्मैददौहरिः॥ तस्मिन्नवसरेचक्षु श्श्रवसामागतः
पतिः ॥५९॥ शरण्यं सर्वलोकानां शरणं श्रीपतिंययो ॥
स्तुत्वा भूयोनमस्कृत्य प्रोवाचेदं शुभाक्षरं ॥६०॥ स्वा
मिन्प्रसादभगव न्नमस्तेपुरुषोत्तम । समीपेवस्तु मिच्छा
मि शश्वत्तेदीयतामिदं ॥६१॥ एतावदेव मेप्रार्थ्यं कृपया
क्षमांहरे ॥ एतदाकर्ण्य भगवां स्तथातस्मै वरंददौ॥६२
॥दत्वातस्मै वरंप्रीत्याशिश्येनन्तो परिस्वयं ॥ अद्यापि द्र
ष्टुकामानां भक्तानां सुलभोहरिः ॥ ६३ ॥ शयानोनन्त
भोगेस्मि न्विभातिपुरुषोत्तमः ॥ अनन्तशायिनं सद्यः

पूजयित्वातुगालवः ॥६४॥ भक्ताना मुत्तमप्राया न्मोक्ष
मन्यसुदुर्लभं ॥ यश्शृणोति कथामेतां पठेद्वा भक्तिपूर्वकं
॥६५॥ सर्वान् कामानवाप्याथ विष्णुलोके महीयते ॥
इतिविष्णुकथां दिव्या मुक्तवान् भक्तिपूर्वकं ॥६६॥ तन
यायै गिरेर्भक्तयाभक्ताना मुत्तमोमृडःइतिश्रीब्रह्माण्डपुरा
णे क्षेत्राणां ॥ वैभवखण्डे गालवमोक्षकथनंनाम पंचमो
ध्यायासमाप्तं ॥

षष्टमाध्यायः प्रारम्भम्

श्रीमतेरामानुजायनमः

॥ शिवउवाचः ॥ देवि विष्णोः परंधाम स्वरूपश्चापि
वर्णितुं ॥ अशक्यमपि तद्भक्त्या कथातस्या भिधीयते ॥
१॥ सनकाद्यादि योगीन्द्रैः कथितं मानसेमम ॥ यत्किं
चि ज्ञातमानन्त्यात् तावन्मात्रमिहोच्यते॥२॥ यत्प्रभाव
मजानन्त्यो निर्वृत्ताः श्रुतयोपितत् ॥ नमोनारायणायेति
प्रणवाद्यं पदत्रयं ॥३॥ अष्टाक्षरं मयादेवि जप्यतेशुद्धचे
तसा॥ तस्मात्तस्यावतारेषु याःकथालोकपानाः ॥ ४ ॥
तास्सर्वाअपि मेज्ञाताः कृपयासात्वतांपतेः ॥ एवमन्यैर-
पिज्ञेयांकथाविष्णो र्महात्मनः ॥५॥ तद्दासत्वा दहंवक्ष्ये-
शृणुदेवि समाहिता ॥ पूर्वंक्षीरांबुधेस्तीरे ब्रह्मालोकपिता
महः ॥६॥ तपस्तप्त्वा चिरंपश्चा दस्तुवत्पुरुषोत्तमं ॥

देवदेव जगन्नाथ नमस्तेपुरुषोत्तम ॥७॥ पाहिमांकृपयाबि
ष्णो परमात्मन्नमोस्तुते ॥ त्वन्मयंहि जगत्सर्वं पातिस्त्वं
सर्वदेहिनां ॥८॥ सृष्टिस्थित्यंत कर्तात्वं जगत्कतास्त्वयंप्रभुः
॥ अजायमानो वहुधा जातस्त्वंलोकपालकः ॥९॥ त्वद्ग
तिं नविजानन्ति योगिनोपि सुरेश्वराः त्वदीयावयवेभ्यस्तु
जाताः सर्वेदिवौकसः ॥१०॥ अहंरुद्रः सुराधीशो वसवो
मरुतो श्विनौ ॥ आदित्याः सरितः शैलाः समुद्रा स्स
प्तमेदिनी ॥११॥ भूर्भुवस्स्व रित्येतेति लोकाःसर्वे चतु
र्दश ॥ओंकारस्त्वं वषट्कारो यज्ञास्त्वं तत्फलप्रदः ॥१२
प्रवर्तकस्त्वं सर्वेषां हृदयस्थो निवर्तकः ॥ त्वामेव पूज
यित्वाहं स क्षाद्वैकुराठवासिनं ॥१३॥कृनार्थस्यां यथास्वा
मिं स्तथात्वं कर्तुमर्हसि एवंस्तोत्रेण दिव्येन चतुर्वक्त्र
स्यधीमतः ॥१४॥ प्रसन्नो भगवान्विष्णुः परमात्मा स-
नातनः ॥ श्रीरङ्गनाथ नामाथ प्रादुरासी द्रमापतिः॥१५
तत्पुण्य परिपाकेन तस्याग्रे वेधसोच्पुनः ॥ तंदृष्ट्वा प्री-
तिसंयुक्तः परमात्मान मव्ययं ॥१६॥श्रीरङ्गनायकं सम्य
क् पूजयित्वा प्रसन्नधीः ॥ प्रत्यहंदेवि लोकेश श्चरितार्थो
बभूवह ॥१७॥ तत्कथां नारदस्याहं तीर्थमाहात्म्य वैभ-
वे ॥ कावेर्यास्तु प्रसंगेन कथयामिस्म वैपुरा ॥१८॥ त
थैव तोदाद्रिकथां रहस्यामप्प गोचरां॥ त्वयिस्नेहा दहं
वक्ष्ये यत्किञ्चित् ज्ञातमात्रतः॥१९॥ अवतारेतु कस्मिंश्चि

त् कृष्णोगोपालबालकैः ॥ लीलयासंचरंस्त्व घंटाकर्ण गतःस्वयं ॥ २० ॥ तंदृष्ट्वा कर्णयोर्बध्वा घंटेकस्त्वं वनांतरे ॥ चरसि ब्रूहि तथ्यंमे श्रोतुमिच्छामि कौतुका त् ॥२१॥ घंटाकर्णउवाच ॥ शिवभक्तोस्म्यहं विष्णुं दृष्टुं श्रोतुंच तत्कथां ॥ तन्नामचासहन्घंटे बद्धेकर्णद्वयेदृढं ॥ २२॥ शिरसश्चालनात्घंटा द्वयनादो भवेदिति ॥ मोक्षार्थं तवतत्वाहं चरामि वसुधातले ॥२३॥ इत्थंघंटाश्रुतेर्वाक्यं कृष्णः श्रुत्वेदमाहच ॥ योविष्णूदूषकोलोके तद्भक्तानांच दूषकः ॥२४॥ उभौतु नरकेघोरे पतेतामितिपापिनौ ॥ तस्मात्त्वं दूषकोमाभूर्मद्भक्तानां ममापिच ॥२५॥ शिवोमद्भक्तभक्तानां भक्तोभवति नित्यदा ॥ तस्मात्ते कृप यादास्ये पृच्छमां यद्यदिच्छसि ॥२६॥ इतिकृष्ण वचः श्रुत्वा विस्मयादित्युवाचसः ॥ बालकोहि ममाग्रेतु को वाशक्तः प्रभाषितुं ॥२७॥ वीक्षितुंवा कथंशक्तः शक्तोपि त्रिदशेश्वरः ॥ तथापि बालकंत्वांतु धीरोदात्त तथाभृशं॥ २८ ॥ गंभीरभाषिणंयाचे मोक्षमद्याहमीहितं ॥ त्वांन मुञ्चाम्यहंबाले त्युक्त्वा बाहुं समग्रहीत् ॥ २९ ॥ इत्युक्तस्तु ततःकृष्णो हसन्मुञ्चेतिचाब्रवीत् ॥ इहैवमो क्षंदास्यामि शिवध्यानं कुरुष्वह ॥३० ॥ तथेतिबालहस्त न्तु नमुञ्चन्नेवसोसुरः ॥ शिवध्यानंकरोमीति निमील्य नयनद्वयं ॥३१ ॥ ध्यायन्तदा शिवंतत्र क्षीरोदंसमवैक्ष-

त ॥ तन्मध्ये चोत्तमंद्वीपं स्वेतं रत्नै रलंकृतं ॥३२॥ क
ल्पकैरावृनंतस्य मध्येमणिमयेग्रहे ॥ शयानंशेषतलेतु भू
षणै र्भूषितं प्रभुं ॥ ३३॥ दृष्ठाविस्मय मापन्नः किमिदं
किमिदंत्विति ॥ पुनःपुन र्ध्यानपर स्तमेवसमवैक्षत ॥
३४॥ शिवध्यानपरस्यापि शेषतल्पेस्थितः पुमान्॥ दृश्यते
बालचेष्ठयमितिमत्वा समूढधीः ॥ ३५॥ पुनःप्राहच तंबा
लं रोषाद्रक्तांतलोचनः॥ बालकश्शृणु मद्वाक्य मद्याहं वि-
ष्णुदूषकः ॥३६॥ त्वद्वाक्य श्रुतवानस्मि योगेदृष्टोमयाह-
रिः॥ क्षीराब्धो चस्वेतद्वीपे कल्पवृक्षैः परिवृते॥३७॥ चि
न्तामणि मयेगेहे शेषतल्पे परःपुमान् ॥ नीलमेघ इवस्या
मः केयुर मुकुटांगदः ॥३८॥ दिव्यचंदन लिप्तांगो दि
व्यमाल्यै रलंकृतः ॥ पीतांबरधरः पादौमंजीर मणिभूषि-
तौ ॥३९॥ स्वर्णकांची लसत्कठ्यां स्वर्णरत्नैरलंकृतः ॥
मुक्ताहार विभूषाढ्यः प्रहसन्मुखपंकजः ॥४०॥ अनन्त-
शक्तिसंयुक्तो ह्यवाङमनसगोचरः। अनिश्चिताः मूर्तिरेवं म
यादृष्टा सुबालकः ॥४१॥ तवदासोस्म्य हंयाचे मोक्षोपा
यं वदस्वमे ॥ लीलार्थं तेप्रदास्यामि घंटेकर्णे विलंबिते
॥४२॥ इतिवेगेन घंटांच छित्वाकृष्णस्य हस्तयोः ॥ धृ-
त्वापादे निपतितःतत्क्षणा द्दययातदा ॥४३॥ तस्पमोक्षं-
प्र दत्वातु लीलयाबालकश्चस ॥ ममस्नेहात्तस्पमोक्षं द
त्तवा नवतारतः ॥४४॥ नारायणस्य महिमा मयावक्तुं न
शक्यते ॥ भक्त्याहरें वदामीदं गुह्याद्गुह्यं तवाप्रिये॥४५॥
मद्भक्तो बाणोगर्वेण युद्धाया हूतवान्हरिं ॥ छेदितास्त-
स्य हस्ताश्च तेनकृष्णेनवैतदा ॥ ४६ ॥

नच्छेदिता श्चतुर्हस्ता मुक्तामत्पीति कारणात्॥ भस्मा-
सुरोमयादत्तं वरंशोधयितुं पुरा ॥४७॥ मांस्पृष्टुकामो वे-
गेन मत्समीपं समागतः ॥ अहंपलायितो भीत्या सोऽपि-
मा मनुधावत॥४८॥ तत्काले चिन्तितो विष्णुर्हरेपाल
य मामिति ॥ तत्क्षणात्सोप्य वतरत् संकर्शण सुमूर्ति-
मान् ॥४९॥ भस्मासुरपुरोभात उवाच मधुरांगिरं ॥ प-
लायितः कस्यभीत्या वलवान् वदानिश्चयं ॥५०॥ तवका
र्यं जयंकर्तुं त्वत्समीप मिहागतः ॥ असुरश्चैतदाकर्ण्य
विरूप मितिचिन्तयन् ॥५१॥ ताटंकं कुण्डलं चापि क
र्णयो र्मकुटायुतं ॥ एकनेत्रां जनयुतं नासामणि विरा
जितं ॥५२॥ अंगुलीयक रत्नाढ्यं वाह्वोर्वलय कंकणं ॥
भुजंगाभरणं हस्ते ह्यन्यत्र विराजितं ॥५३॥ एकहस्तं
विभूषाढ्यःकटिर्दिव्यां वरावृता ॥ विवस्त्रो ह्येकपार्श्वश्च-
पार्श्वोवस्त्रा वृतोपरः ॥५४॥भूषितश्चरणास्त्वेकः पादस्त्वे
को नभूषितः ॥ एवंरूपं नश्रु तंच नदृष्टंकानुदेवता ॥५५
आश्चर्यरूप मेतद्धि कपटाकृतिकन्विदं ॥ इत्थं विचिन्त-
यन्दैत्यः तमुवाच पुरस्थितं ॥५६॥ बहुकालं तपःकृत्वा
रुद्रंवरम याचिषं ॥ स्वेनहस्तेन यस्याहं मूर्धानं संस्पृशा-
मिस ॥५७॥ सत्यक्तासु स्तदैवोर्व्यां शतधानिपतादिति॥
तथेत्युक्ते गिरिशेन तस्मिन्नेवच तंवरं ॥५८॥ शोधयन्
गतवांस्तस्य समीपे त्वरयाह्यहं ॥ रुद्रः पलायितो भीत्या

स्पृष्टुकामं निरीक्ष्यमां ॥५९॥ धावमान स्तमुद्दिश्य मध्ये
त्वा मवलोकयं ॥ कोभवान् कुतआयात स्त्वद्भुतं रूपमा
स्थितः ॥६०॥ भाषमाणस्य तस्यैव माकर्ण्य वचनंहरीः॥
प्रत्युवाच हसन्वाक्यं मधुरोदार मर्थवत् ॥६१॥ संकर्षणो
हं दैत्येन्द्र तवमंत्राधिदैवतं ॥ मद्वाक्यं शृणु तन्मन्त्र ज-
पंकुरुयथाविधि ॥ ततस्तं स्पृश हस्तेन ह्यन्यथानचसिध्य
ति॥ मयासृष्टेतु सरसि स्नात्वास्मिन् जपमाचर॥६३॥ त
तस्तद्वाक्य माकर्ण्य स्नात्वा मायासरोजले ॥ तटेस्थित्वा
तु तन्मन्त्रं जप्तुं हस्तं स्वमस्तके ॥६४॥ विनिक्षिप्या सु
रोभूमौ भस्मभूतो पतत्तदा॥ एवंरक्षितवान् विष्णु स्तत
त्कालेषु सामजः॥ ६५॥ अहमप्य गराट्कन्ये रूपंविष्णो
र्नदृष्टवान्॥ देवैरपिचगंधर्वै स्सिद्धै र्योगीश्वरैरपि ॥६६ ॥
नशक्यं श्रीपतेर्द्रष्टुं रूपमेतादृशंत्विति॥ सर्वलोकेशितु स्त
स्य चरित्रं पापनाशनं ॥६७ ॥ पापीनां नास्तिकानांच
पतितानां दुरात्मनां॥ मूर्खानां मूढचित्तानां म्लेच्छाना म
कृतात्मनां ॥ ६८ ॥ भक्तिर्नारायणेनास्ति दांभिकानां
विशेषतः ॥ तेभ्योवक्तु मयोग्यंहि चरित्रं पावनंहरेः ॥
६९॥ येतुश्रद्धा दयासंबि त्सत्यवंतो गुणोत्तराः ॥ वैष्ण-
वेषु पराभक्ति र्येषां नारायणेपिच ॥७० ॥ तेभ्योनारा
यणकथा वक्तुंयोग्या वरानने ॥ पार्वति विष्णुभक्तानां
शृणुलक्षण मुच्यते ॥७१ । येतुकर्माणि कुर्वंति स्वकुला

त्यागपूर्वकं । विपक्षेषु स्वपक्षेषु येनरा स्समबुद्धयः ।७२।
अहिंसा क्रोध धैर्याणि सत्यावाणि स्थिरादया ॥ अलो
भं दानबुद्धिश्च विष्णुभक्तेषु सर्वदा।७३ सर्वं विष्णुमयंचेदम
षः मेतादृशीमतिः ॥ ताविष्णुभक्ता उच्यंते सर्वलोकेषु
पावनाः ॥७४॥ विष्णुभक्तेषु वात्सल्यं सततंविष्णुपूज-
नं ॥ तत्कथासुच विश्वासो भक्तिपूर्वं यथाश्रुतिः।७५।
आनन्दबास्पो रोमांचः कीर्तने गद्गदस्वरः ॥ मनोवा क
र्मणा मैक्यं तिष्ठंत्येतानि नित्यदा।७६ ॥ यस्मिन्मर्त्ये स
वैभक्तो विष्णोपरमपावनः॥ एवंविधानां भक्तानांमाहात्म्यं
पठ्यतामिदं ॥७७॥ कुंभकोणे महाक्षेत्रे लक्ष्मीः पद्मसर
स्तटे॥तपःकृत्वा स्थिताकाले चिन्तयन्ताच तंहरिं॥७८॥
वरंदातुं हरिर्लक्ष्मी यंत्रयोगेस्थितातटे॥ आविरासी त्तत-
स्तत्र दिव्यरूपधरःस्वयं ॥७९॥ कोटिसूर्य प्रतिकाशः
कोमलावयवैःशुभैः ॥ सर्वाभरण संयुक्तः सौंदर्यनिधि
रूपवान् ॥८०॥ अग्रेस्थितं हरिंदृष्ट्वा विस्मयो त्फुल्ललो
चना॥उत्थायच हरेर्लक्ष्मीः पादयोः सायथाविधि ८१॥
नमस्कारं पुनःकृत्वा स्तोतुं समुपचक्रमे॥ ॐनमो दिव्य
रूपाय दिव्यास्त्राणिचाबिभ्रते ॥८२॥ आदिदेवाय देवा-
नां देवनायक तेनमः ॥ दिक्काला द्यनवच्छिन्ना नन्द चि
न्मात्रमूर्तये ॥८३॥ नारायणायाप्रमेय परब्रह्म स्वरूपि-
णे ॥ गुणत्रय विहीनाय गुणानां निधयेनमः॥८४॥ नी

वार शूकव त्स्वर्ण भासिसूक्ष्मात्म रूपिणे॥ भास्वते दीप
वन्नित्यं हृन्मध्ये सर्वदेहिनां ॥८५॥ नमोबेध स्वरूपाय
रुद्ररूपाय तेनमः ॥ विराट्स्वरूपिणेतुभ्यं नमोदिक्पाल
मूर्तये ॥८६॥ मांपालय जगन्नाथ त्वामेवशरणंगतां ॥
दीनानाथ परित्राणे दीक्षिताया खिलात्मने ॥ ८७ ॥
नमस्ते पद्मनाभाय पंकजाक्षाय तेनमः ॥ इत्येवं बहुधा
स्तोत्रं श्रुत्वादेव्याजनार्दनः ॥८८॥ परितुष्टोस्मि तपसा
भक्त्याचा नन्ययातव ॥ वरंवृणीष्व भद्रंते माभूत्कालवि
लंबनं ॥८९॥ इत्युक्त्वा श्रीपतिर्देवी मूर्धेसंस्पृश्यपाणिना
॥ कृशासितपसोग्रेण ब्रूहियन्मनसेप्सितं ॥९०॥ ततःप्री
तिसमायुक्ता श्रुत्वावाक्यंतुशार्ङ्गिणः ॥ नमस्कृत्वाथतंल
क्ष्मी रुवाच वरमीप्सितं ॥९१॥ एतत्पुष्करिणीतीरे शेष
तल्पे खिलात्मनां ॥ रक्षणार्थाय भगवन् शयनं कर्तुमर्ह
सि ॥९२॥एवंपुण्येषुदेशेषु सुलभ स्सर्वदेहिनां॥ मयासहा
र्चारुपेण सन्निधिं कुरु केशव ॥९३॥ स्थानेषुच त्वदीयेषु
नित्यंच वसतामिह ॥ तिरश्चामपि मुक्तिःस्या त्त्वप्रभावात्त
व माधव ॥९४॥ लीलार्थे ष्ववतारेषु भवेयं सहधर्मिणी
॥ तापत्रयाभि तप्तानां जीवानां शरणैषिणां ॥ ९५ ॥
संसारार्णव मग्नानां त्वामृते पूरुषोत्तम ॥ शक्तमुत्तारणेदे
व नाहंपश्यामि कंचन ॥९६॥ सत्वंप्रवृत्त स्सृष्ट्यादौ म-
यासंबोधितःप्रभो ॥ रक्षसर्वा निमान्जंतू न्सापराधांश्च

मत्कृते ॥९७॥ एतदाकर्ण्य वचनं पद्मिन्याः पुष्करेक्षण
॥ प्रेमपूर्व मुवाचेदं मनसा कांक्षितंहितं ॥९८॥ तत्स-
र्वं मत्प्रसादेन भविष्यति नसंशयः ॥ इदंरहस्यमन्य त्तपू
र्ववृत्तंच मेश्रृणु ॥९९॥ श्रीभगवानुवाच ॥ शप्त्वाच पूर्व
मज्ञानात् भृगुर्मा तत्त्वसवृतः ॥ तत्क्षामणार्थं तोदाद्रौ
तपसात्वा मतोषयत् ॥१००॥ त्वत्प्रीत्यै विहगाधीश मा
गच्छाहं त्वयासह ॥ गत्वातस्या श्रमंदेवि सरसो दक्षिणे
तटे ॥१०१॥ ब्रह्मेशानादि दुर्दर्शं आत्मानं समदर्शयं ॥
प्रणम्य चावां समुनिः स्वापराधं निवेद्यच ॥१०२॥ क्षा
मयित्वात्म निक्षेपं कृत्वासमुनिपुंगवः ॥ वव्रेवरं प्रसन्ना
यांमम्पुत्रीभवेर्तावै ॥१०३॥ जामाताच भवेद्विष्णु श्च
क्रपाणि स्सतांगतिः ॥ चतुर्भुजो रविंदाक्ष शरणागतव
त्सलः ॥१०४॥ युवामत्रैव वसतं यावत्कालं ममाश्रमे ॥
तोदाद्रौ परिचर्यांच युवयोः करवाण्यहं ॥१०५॥ त्वत्प्र
धान मिदंक्षेत्रं पद्मभवतुनित्यदा ॥ इत्येवं दुर्लभतरं श्रु
त्वा तद्भाषितंमुनेः ॥१०६॥ सस्मितं वीक्ष्यमांदेवि समा
श्लिष्यच बाहुना ॥ तथेतिच प्रतिज्ञातं त्वयानुग्रहरूपया
॥१०७॥ ततःकतिपयाहस्सु गतेसु मुनिसत्तमात् ॥ भृ
गोःख्यातया समुत्पन्ना चक्रेमभवतीचमां ॥१०८॥ पुनस्त
स्या श्रमंगत्वा परिवारयुतेनच॥ मयोढा विधिवत्पूर्वं सर्व
लोकस्य सन्निधो ॥ १०९ ॥ तदाप्रभृति तत्रैव पुंडरीक

विलोचने ॥ स्थियतेनित्यमावाभ्यां भृगुःपरिचरन्मुदा
११०॥ आस्ते तदाश्रमेद्यापि तत्क्षेत्रंतु तवाश्रियः ॥ उ
त्वत्या संनिधानाच्च श्रीनिवास मितीर्यते ॥ १११॥ श्री
निवासेति मेनाम तोदाद्रिश्वरइत्यपि ॥ देवनायक मार
क्षे त्याह मामनिशंभृगुः ॥११२॥ दुराचारोपि सर्वाशी
कृतघ्नो नास्तिकःपुरा ॥ सतुमां शरणंयाति देवनाथं व
रानने ॥११३॥ तस्मैमुक्तिं प्रदास्यामि त्वत्कृते नात्रसं
शयः॥कृमिकीट पतंगाद्या मुच्यंते सर्वकिल्बिषैः॥११४॥
चेतनाःकिं पुनर्भक्ताः सर्वेविषयवासिनः॥क्षेत्रेतास्मि न्म
हापुण्ये त्वत्प्रीत्यै निवसाम्यहं ॥११५॥ श्रीरङ्गे वेंकटा
द्रौच श्रीमुष्णे हस्तिभुधरे ॥ कुंभकोणे श्रीनिवासे सार
क्षेत्रे तथैवच ॥११६ ॥ गोष्टीपुरे सत्यगिरौ वुत्पलावर्त
केतथा ॥ कपालकुण्डने क्षेत्रे आकाशनगरेतथा॥ ११७
नारायणाद्रौ नीलाद्रौ तोदाद्रौ वृषभाचले ॥एवमादिषु
देशेषु त्वयासह वसाम्यहं ॥११८॥ जगत्सृष्ट्यादिकंसर्वं
लीलार्थं पद्मसंभवे ॥ कुर्वन्नहं सरोजाक्षि किंनकुर्यां प्रि
यंतव ॥११९॥ एवमुक्ता जगन्नेत्रा सर्वलोक महेश्वरी॥
उवाच त्वत्समीपेहं वसामि सततंहरे ॥१२०॥ प्रदेयं
वरमेतन्मे प्रसन्नो भगवांस्तदा ॥ इत्युक्तं वाक्यमाक
र्ण्य देव्यादेवो जनार्दनः॥१२१॥तथैवोमित्य नन्तांगे श्री
समेतो महाद्युतिः ॥ शार्ङ्गपाणि रिति ख्यातः शयाना

स्सेव्यतेसदा॥१२२॥अन्यक्षेत्रेषुसर्वेषु यद्यत्पापंकृतंभुवि।
तत्पापंविलयंयाति तोताद्रौ देवमत्स्थले ॥१२३॥ स्वयं
व्यक्तेषु सर्वेषु तोताद्रिस्थल मुत्तमं॥ अतस्सदावसाम्य-
त्र ह्यनन्तफल सिद्धये ॥१२४॥ तत्रैव वसतां पुंसा म-
खिलार्थंच लभ्यते ॥ तोताद्रेः कीर्तनाल्लोके दर्शनात्स्थ
लवैभवात् ॥१२५॥श्रवणात् पापशान्तिस्स्यात् देतेमुक्तिश्च
लभ्यते ॥ तत्स्थले जन्मिनो मर्त्याः कीटाश्च मृगपक्षि
णाः ॥१२६ ॥ जन्मान्तर कृतंपापं त्यक्त्वा मोक्षमवाप्नु
युः ॥ यत्रयत्रास्थितोवापि यत्रयत्रगतोपिवा ॥ १२७ ॥
तोताद्रि स्मरणादेव पूज्यंते नित्यसूरिभिः ॥ इति परम
रहस्यं लोकसृष्ट्यादिपूर्वं परमपदफलाप्त्या रोहणंविष्णु
भक्त्याः ॥ जनकमखिलतत्वं ज्ञापकंसच्चरित्रं गगनगिरि
वरस्य प्राहदेव्यैमहेशः १२८ इतिश्री ब्रह्माण्डपुराणे क्षेत्रवै
भवखंडे तोताद्रिमाहात्म्येउमामहेश्वरसंवादे श्रीयःप्रत्यक्ष
विवाह स्थितिर्नाम ॥ षष्ठोध्यायःसमाप्तम् ॥

सप्तमोध्याय प्रारंभ

॥ श्रीमतेरामानुजायनमः॥ श्रीशिउवाचः॥ देवित्वया
समालोके सतीनास्ति वरानने॥ मत्तोविष्णु कथां श्रोतु
मन्येषां भुविदुर्लभं ॥१॥ सदामत्सेवया भक्त्या याचि-
तोहं त्वयानघे ॥ रहस्यानां रहस्यंही वक्ष्ये हरिकथामु

मे ॥२॥ पुरा ब्रह्मावरेणाथ लोकसृष्टिं चकारसः ॥देवा
श्च यक्षगंधर्वा किन्नराश्च सुराङ्गनाः॥३॥ सृष्टाः प्रजानां
पतिना बहुशो देवयोनयः॥ तासुकाचि द्वराश्रेष्टा बहूमा
या विहारिणी॥४॥ ऊर्वशीनाम साप्रोक्ता बिभ्रती वपुरु
त्तमं ॥ देवेन्द्र पदवी मिच्छ न्योनरः कुरुतेतपः॥५॥ त
स्यधैर्यं ध्वंसयन्ती मोहंकृत्वा विशेषतः॥एवंसा तपसोवि
घ्नं कूर्वंती गाधिनंदनं ॥६॥ कदाचि त्प्रेक्ष्यतस्यापि तपो
विघ्नं चकारह ॥ तन्निमित्तं मिथोनष्टा बहवो राक्षसायु-
धि ॥७॥ गानेच नर्तने लोके तयानास्ति समावधूः॥ ना
नाविधेषु लोकेषु चरंती प्रीतिसंयुता॥८॥ कदाचि त्सत्य
लोकेसा गतालीलार्थ मुर्वशी ॥ ब्रह्माणंच नमस्कृत्य वी
णामादाय सुन्दरी ॥९॥ अगायत सभामध्ये दर्शयन्ती
स्वकौशलं॥ तदादेवा स्सगंधर्वा इशक्राद्या लोकपालकाः
॥ १० ॥ ऋषयश्च महात्मान स्तयागानेन तोषिताः॥ त
स्मिन्काले सभामध्ये वीणामादाय सत्वरं॥११॥ समाग
त्य विधिंनत्वा ह्यगाय त्सातिलोत्तमा॥तस्यागीतेन संतु
ष्टा स्तदासर्वे सभासदः ॥१२॥ ऊर्वशीच तदारुष्टा तामु
द्विक्ष्या ब्रवीदिदं॥ गानमध्ये समागम्य गायासित्वा मम
र्षिता ॥१३॥ भूमौकृतेन पुण्येन माघस्नानेन बालिशे ॥
सत्यलोकं गताहित्वं मत्समाना ममाग्रतः ॥१४॥ येतुकु-
र्वन्ती चोग्राणि तपांसि मुनिपुंगवाः ॥ प्रेरितात्वगत्वा-

हं देवराजेन तत्क्षणात् ॥१५॥ तेषांच तपसांविघ्न माच
रन्ती विधैरपि॥अन्येषा मपिसिद्धानां ऋषीणां भावितात्म
नां ॥१६॥ राक्षसानां मनुष्याणां तत्तद्वेषेण संयुत॥ कुर्व
न्ती तपसां विघ्न मानयं स्ववशंचतान् ॥१७॥ मोहिता
स्तेपि मद्वेष दर्शनादेव योगिनः ॥ मत्संगमे कृतोत्साहा
प्रार्थयन्तिस्म मांचिरं ॥१८॥ अहमेव दयांकृत्वा त्यक्त्वा
वेशंच मोहनं॥ प्रकृतिं स्वामथ प्राप्ता तैश्चतप्तं महत्तपः॥
१९॥इत्यहं देवकार्य्यार्थं निर्मिता ब्रह्मणापुरा॥ त्वयाप्रयो
जनेलोके साधितांकिं वदस्वमे ॥२०॥ श्रुत्वावाक्य मथो
र्वश्याः प्रत्युवाच तिलोत्तमा ॥ चेटित्वं मत्समा मूर्खे क
थंस्याः कालयोगतः ॥२१॥ वसामिसत्यलोकेहं स्वर्गेत्वं
तुकृतालया॥ सत्यादत्यंतहीनोहि स्वर्गोभोगैस्तू बालिशे
॥ २२ ॥ क्षिणेपुण्ये मर्त्यलोके पुनर्जन्म पुनर्मृतिः ॥ त
स्मान्नृणांच देवानां भेदौनो न्मीलनात्परं ॥२३॥ तस्मा
त्वं मत्समानस्याः स्वर्गलोके निवासिनी ॥संतिकर्माणि
कृत्वाहं भगव त्कृपयाचिरं ॥२४॥ तत्कर्मणां प्रभावेन
सत्यलोके स्थितिंगता ॥ अस्मिन्लोके स्थितानित्यं ब्रह्मा
लोकेश्वरोहिसः ॥२५॥ तदयंसर्वलोकाना मुत्तमो लोक
उच्यते ॥ यल्लोके गंतुमिच्छामि तस्मिन्यास्ये निरर्गला
॥२६॥ तोताद्वैतु पुराकृत्वा तपोविष्णु मतोषयं तस्य
प्रसादा त्सत्येस्मि न्प्राप्तावासांमितःपरं ॥ २७ ॥ विष्णु

सामीप्य मेवाहं प्राप्स्यामि तदनुग्रहात् ॥ सुखिनी सत्य
लोकेस्मि न्वसंतीत्व विचारतः ॥२८॥ तत्काले राक्षसा
स्सर्वे क्षयंप्राप्ताउतःस्वयं ॥ माहिष्मती राक्षसीसा तपःक्रूरं
समाचरत् ॥२९॥ तांतपंती मनुध्याय ब्रह्मासाक्षा च्चका
रसाः॥आगतंतमभिप्रेक्ष्य वरमेकमयाचत॥३०॥द्वौपुत्रौ म
मदातव्यो बलवंतौ दुरासदौ॥ अवध्यौ सर्वथासर्वै रिति
वव्रे सुदारुणं ॥ ३१॥ तथेत्युक्तेतु विधिना राक्षसी स्वगृ
हंगता ॥ ब्रह्मापि स्वर्गतोलोकं पूज्यमानो महर्षिभिः ॥
३२॥ ततःसा सुषुवे पुत्रौ राक्षसी राक्षसोत्तमौ॥ राक्षसा
नां गुरुःशुक्रो भगवा नागत स्तदा ॥३३॥ सुन्दश्चे त्यु
पसून्दश्च नामकर्मा करोत्तयोः ॥ ततस्सुन्दो पसुन्दौतौ
ववृधाते महाबलौ ॥३४॥ मातुर्वर प्रसादेन चिकीर्षु र्दि
ग्जयं क्रमात् ॥ तस्मि न्नवसरे दैत्याः पाताला न्निर्गताः
स्वयं ॥३५॥ पंचकोट्यो महावीर्या स्तयोःपार्श्व मुपाग
ताः ॥ व्यजिज्ञप न्नमस्कृत्य किमिदं दुरवस्थितौ॥३६॥
मत्सहाया विनिर्गत्य स्वर्गलोकंच तिष्ठतं ॥ त्वदाज्ञया
वयंलोकान् जयिष्यामश्च लीलया ॥३७॥ तच्छ्रुत्वा व
चनंतेषां दैत्यानां तौमहाबलौ ॥ऊषतुश्च चिरभोगान् भुं
जानौ देवराजवत् ॥३८॥ देवापलायिता स्सर्वे सिद्ध
गंधर्व किंन्नरैः ब्रह्माणं शरणं प्राप्ता नमस्कृत्वा व्याजिज्ञ
पन् ॥३९॥ सुन्दोप सुन्दो भगवन् त्वद्वराद्दै बलोत्कटौ ॥

लोकान् जित्वा खिलान्स्वर्गेवर्तेतेराक्षसै स्सह॥४०॥तौहंतुं
सर्वथोद्योगं कुरुष्वेतिच तेब्रुवन् ॥ श्रुत्वादिवौकसां वाक्यं
ब्रह्मालोकपितामहः॥४१॥मामाहूय कृपाविष्टस्तयोस्संहार
कारणात् ॥ प्रेषयामास तौहंतु महमेकै वानिर्गता ॥४२॥
भूषिता भूषणै मुख्यै र्गंधमाल्यैर नुत्तमैः॥ गत्वाहं नंदनो
द्यानं गायंतीच विपंचिकां॥४३॥सुन्दोप सुन्दयोर्दूता मां
दृष्ट्वा विस्मितास्तयोः॥भवनंप्राप्य वेगेन संभ्रमा दब्रुवन्व
च॥४४॥ राजानौ नन्दनोद्देशे दृष्ट्वा कांचित्सुराङ्गनां॥ दे
वयोग्येति निश्चित्य विज्ञापितु मिहागताः॥४५॥ इ
ति विज्ञापितं श्रुत्वा दूतैर्मोहेन निश्चितौ॥दृष्ट्वामां नन्दनो
देशे गायंतीं मधुरंतदा ॥४६॥ ममेति ममभार्येय मूच
तु स्तौपरस्परं॥अन्योन्यं वादयित्वातु चक्रतुर्युद्धमद्भुतं॥
४७॥पञ्चकोट्य सुरास्सद्यो निशेषं निधनं गताः॥ तत
सुन्दोप सुन्दौतौ गदायुद्धं वितेनतुः ॥४८॥ ताडयित्वा
तु मां दृष्ट्वा अन्योन्यं मरणंगतौ॥ ततोहं ब्रह्मणो लोकं
गत्वा कृत्वा नमस्क्रियां॥४९॥ सुन्दोप सुन्दयोर्वृत्त
मित्यवोचं यथाक्रमं॥ततोमे वांछितं वेधा दास्यामी त्या
हवैवरं ॥५०॥ ब्रह्मणो वाक्य माकर्ण्य विष्णोस्सामीप्य
मेवमे ॥ प्रसन्नोमयिचेद्देयं वरमिष्ट मिदंमम॥५१॥ इति
मद्वाक्य माकर्ण्य ह्युवाच कमलासनः॥ तथाभवतु तो
दाब्धौ तपःकुरु यथाविधि॥५२॥ इत्येवं ब्रह्मणः प्राप्य

वरंगच्छाम्य नुत्तमं॥तौदादौ तप्तुमन्येषां दुष्करं परमंतपः ॥५३॥ अहंच तत्र गच्छामि परेण तपसाहरिं॥ तोषयि त्वाथ संप्राप्तंतत्सामीप्यं सुदुर्लभं ॥ ५४ ॥ इत्यन्योन्यं संवदन्त्या वुर्वशीच तिलोत्तमा॥ प्रपेदाते स्वयंव्यक्तं तौ दाद्रि स्थलमव्ययं ॥५५॥ नानावृक्ष लताकीर्णं पुष्पौ घै स्सुरभिःकृतं॥चंदनैः स्यंदनै श्चूतैः पनसैश्च कापित्थकैः ॥५६॥ खर्जूरै रर्जुनै र्नीपै दाडिमै र्बकुलैरपि॥ बिल्वै राम लकै रुच्चैः कदलीनांच संचयैः ॥५७॥ मल्लिका पाटली कुन्द कुरु विन्दैश्च चंपकैः॥अन्यैश्च पुष्पितै र्वृक्षै श्छायाव द्भि र्मनोहरैः ॥५८॥ मंदमारुत निर्धूतै श्शीतीकृत व नांतरं॥ पारावतै श्शुकैः केकी कोकिलै श्चाभिनादितं॥ ५९॥ वराहै र्माहिषै र्व्याघ्रै र्मार्जारै र्वनसूकरैः॥ मत्तै र्ग जैश्च पञ्चास्यै र्व्यालिभि श्चपरैर्मृगै ॥६०॥एणीभिः कृष्ण सारैश्च गोधिकाभिश्च पन्नगैः॥एतैरन्योन्य निर्वैरैर्यूथैर्यूथैश्च सेवितं ॥६१॥ कल्हारैः कुमुदै र्नीलै रुत्पलैः श्वेतपंकजैः उत्फुल्लैः कमलै र्नित्यं शोभमानै स्सरोवरैः ॥६२॥ संपूर्ण पारिजाताद्यै र्दिव्य वृक्षैश्च शोभितं॥लताभि र्दिव्यरूपाभिः पुष्पिताभि रनेकशः ॥६३॥ राजितंराजहंसैश्च चक्रवाकै श्च सारसैः॥ नत्यूहैः संततोन्मत्तै स्सन्नादित वनांतरं ॥ ६४॥ तस्मि न्सुपावनं तीर्थं सर्वै र्लोकै स्सुपूजितं ॥ पंकतामरसं नाम पावनं सर्वदेहिनां ॥६५॥ तत्तीर दे

वगंधर्वा स्सिद्धाश्चैव ऋषीश्वराः ॥ यतयश्च महात्मानो
योगिनश्च जितेन्द्रियाः ॥६६॥ चारणाः किन्नराश्चैव
विद्याधर महोरगाः ॥ तोताद्रिनायकंदेवं सर्वलोकै र्नम
स्कृतं।६७।वरदं सर्वभूतानां संततं पर्युपासते॥दृष्ट्वातौद्विस्मि
ते भूत्वा नत्वा तोताद्रिनायकं ॥६८॥ कारणं जगता
मीशं उर्वशीच तिलोत्तमा॥ मुनिं पतंजलिं नत्वा द्योत
मानं तपोर्जितं॥६९॥सहस्र फणसंयुक्तं सर्वदेवै र्नमस्कृ
तं॥ तांश्चसर्वा न्मुनीन्सिद्धा न्तत्रत्यान् विजितेन्द्रियान्
॥७०॥ प्रदर्शे कुत्रचि त्तस्मि न्नुर्वशी सातिलोत्तमा॥
तृणकाष्ठ जलैर्युक्ते युक्तेपरमसात्विकैः ॥ ७१॥ गत्वात-
स्मि न्महात्मानं वैखानस मृषितदा ॥ तप्यंत मृषिभि
स्सार्द्धं तपःसिद्धै र्महात्मभिः॥७२॥ वैखानसै र्बालखिल्यैः
संप्रक्षालै र्मरीचिभिः॥बहुभि र्देवगंधर्वै र्विद्याधर महोरगैः
॥७३॥ उपास्यमानमे काग्रं ज्वलंतं स्वेनतेजसा ॥ मू-
र्तिमंत मिवासिनं तपसांराशि मूर्जितं ॥७४॥ दान्तं
शांतं जितक्रोधं विजितारिं महौजसं ॥ प्राणायामेन मह
ता ध्यायन्तं वैजनार्दनं ॥७५॥ ब्रह्मासने समासीनं रा
जन्तं ब्रह्मवर्चसा ॥ नत्वा तंमुनिशार्दूलं वैखानस मथो
चतुः ॥७६॥ भगवंस्त्वत्कृपालेशा दावामत्रा गतंहरेः॥
प्राप्तुं सामीप्य मिच्छन्त्या वित्याज्ञापय नौमुने ॥७७॥
ततःस भगवान्वाक्यं श्रुत्वा वैखानसस्तयोः॥ श्रीमदष्टा

क्षरजपं कुरुतंवै यथाविधि ॥७८॥ पंकजानरसे स्नात्वा
ध्यात्वा तोतादि नायकं ॥ ततःस्यात् विष्णुसामीप्यं ल
ब्ध मन्यसुदुर्लभं ॥७९॥ ततस्तद्वाक्य माकर्ण्य नत्वा
वैखानसं मुनिं ॥ पतंजालिं नमस्कृत्वा ततस्ते तपसेगते
॥ ८० ॥ मुनिवेष धरेभूत्वा जटावल्कल संयुते ॥ अश्नं
त्यौ जीर्णपर्णानि स्थिते पंचाग्नि मध्यतः ॥ ८१ ॥ कुर्वं
त्यौ सर्व कर्माणि नित्यं हरिपरायणे ॥ श्रीमदष्टाक्षरजपं
यथादेशं स्मचक्रतुः ॥८२॥ तर्पणंच यथान्यायंहोमं भो
जन मेवच ॥ एवंकृत्वा तपोनित्यं गुरुशुश्रूषणंचते ॥
॥८३॥ कुर्वंत्या वर्द्धयेतेस्म चिंतितंमुनिसत्तमं ॥ भगव
न्विष्णुसामीप्यं कदानौ संभाविष्यति ॥८४॥ केनोपाये
न वक्तव्यं वात्सल्यादा वयोर्मुने ॥ श्रुत्वा वैखानसोवा
क्यं तयोर्वै मुनिसत्तमः ॥८५॥ ज्ञात्वाप्रत्यक् दृशासर्व
मब्रवीद मृतोपमं ॥ श्रुयतां सुरनार्योमे वर्धनं त्वत्सुखो
त्तरं ॥८६॥ सर्वेषां विष्टपानांहि स्वर्गलोकोति रिच्यते ॥
तस्मात्सत्य स्ततोविष्णु लोकःसर्वोत्तमोमतः ॥८७॥ यं
प्राप्य ननिवर्तंते तद्विष्णोः परमंपदं ॥ प्राप्यते तच्छ्रि
योभर्तुः कृपयैवा मलात्मनः॥८८॥अन्यथा दुर्लभं लोके
तपोयज्ञ क्रियादिभिः ॥ तस्मादष्टाक्षरी मेव जपन्त्यौ सु
रयोषितौ ॥८९॥ ध्यात्वाच विष्णुंवरदं सर्वलोकेश्वरंप्रभुं
॥ वर्तेते यदिलोकात्मा तदाप्रत्यक्ष मेष्यति ॥९०॥ इति

वैखानसे नोक्तं मुनिना भावितात्मना ॥ वचनं तस्य
माकर्ण्य प्रा नन्दे वराङ्गने ॥ ९१ ॥ ध्यात्वा नारा
यणंदेवं तपउग्रं समास्थिते॥ तिलोत्तमा चोर्वशीच जप
त स्समनूत्तमं ॥९२॥ एवंतप श्चरंत्यास्तुबहवो वत्सराग
ताः ॥ ततोनारायणो देवो भूषणोत्तम भूषितः ॥९३॥
लक्ष्मी महिभ्यां सहितः विमानं दिव्यमास्थितः ॥ त्रि
राजय न्दिशस्सर्वाः स्वीयया प्रभया प्रभुः ॥९४॥ तो
ताद्रि रितिविख्यात स्थले यत्रसुराङ्गने ॥ अविरासी
त्सलोकात्मा तदातत्र स्वयंहरिः ॥९५॥ स्तूयमानो मु
निगणैः सनकाद्यैश्च योगिभिः॥ ब्रह्मशाद्यैः सुरैर्मुख्यै गँ
धर्वैः सिद्धचारणैः ॥९६॥ अप्सरोभि र्वराहाभि र्नृत्यंती
भि स्समंततः ॥ ततःसुराङ्गने चोभेदृष्ट्वा लक्ष्म्याः पतिं
पुरः ॥९७॥ योगमुत्सृज्य वैवेगा दुर्वशीच तिलोत्तमा॥
आनन्दरूपिणं देव मचिंत्यं हरिमच्युतं ॥९८॥ स्तुत्वा
पुरुषसूक्तेन नमस्कृत्वा पुनःपुनः ॥ बद्धांजलि पुटेभुत्वा
स्तुवंत्यौ गद्गदस्वरं ॥ ९९॥ आनन्दाश्रु परीताक्ष्यौ कं
पमानेच भक्तितः ॥ अग्रतो मधुहन्तुस्ते तस्थतु र्द्या
न मास्थिते ॥१००॥ ततोनारायणो देवः शंखचक्र ग
दाधरः ॥ पीतवासा जगद्भर्ता कर्ताचैव सतांगतिः ॥
॥१०१॥भक्तवात्सल्य सौशील्य सौलभ्यादि गुणोदधिः॥
दर्शनीयो दयासिन्धु रिन्द्रनीलाचल प्रभः ॥१०२॥स्म

यमानस्तु तेदृष्ट्वा प्रोवाच मधुराक्षरं॥ भोभोदृ देवसुन्द
र्यौ दिव्यान्भोगा न्विसृज्यच ॥ १०३॥ देवलोका दिह
प्राप्ते किमर्थं कुरुथस्तपः ॥ अमृतं भोजनं यात्रा विमा
ने सुमनोहरे ॥१०४॥ निश्चलाच स्थितिस्सम्यक् देवो
द्यानेषु चारण ॥ सर्वंत्यत्का तपः कस्मा त्क्रियते देवक
न्यके ॥१०५॥ युवाभ्यां मिहतोदाद्रौ वक्तव्यं स्वंमनो
गतं ॥ ततस्ते सुजनेनार्य्या वुर्वशीच तिलोत्तमा॥१०६
॥ ऊचतुः परमोदारं लक्ष्मीशं स्वमनीषितं ॥ भगवन्स
र्वलोकाना मण्डाना त्वमधीश्वरः ॥१०७॥ सृष्टं पातुंच
संहर्तुं शक्तोह्यसि सुरोत्तमा ॥ मत्स्यरूपी पुराभूत्वा वे
दानुद्धृत वान्स्वयं॥१०८॥ कूर्मोभूत्वाततः पृथ्वीं धारय
स्य चलोत्तरां ॥ पोत्रीरूपं वहन्पश्चात् उद्धरेस्त्वं मही
मिमां ॥ ततो दिशोगजोभूस्त्वं पश्चाच्छेषो भवः स्वयं
॥१०९॥ सएष भगवा न्भर्ता सर्वेषां जगतामपि ॥ त
स्योपरिच भूभागो नवखण्ड इतिस्मृतः ॥११०॥ तन्म
ध्येतु महामेरुः कांचनो दिव्यरुपवान् ॥ समुद्रस्सप्त शै
लाश्च दीपैस्सप्तभि रावृतः ॥१११॥ श्वेतद्वीपो महांस्त
स्मि न्भूभागे परमोत्तमः ॥ शंभु स्त्वद्दर्शनाकांक्षी द्वीपेत
स्मि न्सुपांडुरे ॥ ११२ ॥ तपस्तपतिधर्मात्मा श्वेतर्षिस्स
न्सुरोत्तमः ॥ चक्रवाल गिरिः पश्चा त्सूर्य्या चन्द्रमसोर
थः ॥११३॥ तस्मिंश्चरति वैनित्यं भ्राजयन्वै वसुन्धरां॥

नभस्थलं दिशस्सर्वाः त्वदाज्ञां परिपालयन् ॥११४॥ श्रु
तिः स्मृतिश्च नीतिश्च शास्त्राणि विविधानिच ॥ यज्ञादि
कानि कर्माणि ज्ञानं भक्ति र्द्विधाचसा ॥११५॥ प्रपत्ति
रितिसर्वाणि त्वदाज्ञै वेतराणिच ॥ चतुर्विधानि जन्मा-
नि मनुष्याश्च चतुर्विधाः ॥११६॥ आश्रमाश्च तथैवोर्व्यां
जातिभेद स्त्वनेकधा ॥ चतुर्विंशति तत्वानि गुणास्त्रेधा
षडूर्मयः ॥ ११७ ॥ पापं पुण्यं सुखं दुखं भोगो मुक्ति
र्भवोद्भवः ॥ एतत्सर्वं मनुष्याणा माज्ञयाते विवर्तते
॥११८॥ ऋषयोपि महात्मान स्तपसा धूतकल्मषाः ॥
त्वन्मायां नविजानन्ति ममकारं गताःप्रभो ॥११९॥ जा
नन्ति केचि त्वद्भक्ता स्संत स्त्वच्छेषभोजिनः॥त्वदीयच
रणद्वंद्वे न्यस्तभारा स्सतांमताः ॥१२०॥ तस्मा त्सर्वेषु
कालेषु त्वदीये चरणांबुजे॥ दातव्या भक्तिरेकैव त्वायोः
सात्वतांपते ॥१२१॥ त्वद्भक्ति लेशमात्रेण लब्धंस्या दे
हिकंहरे ॥ कर्तुंत्वत्संनिधौनित्यं कैंकर्य्यं कर्तुकामतः।१२२।
तदाद्रौ तुस्वयंव्यक्ते सर्वदेवै र्नमस्कृते ॥ ध्यायंत्यौ स-
र्वदातारं कुर्वस्त्वांवै तपोर्जितं ॥ १२३ ॥ त्वंतु प्रत्यक्षतां
यातो ह्यावयो र्भाग्यवत्तया ॥ दातव्या तवसामीप्य स्थि
तिरन्य सुदुर्लभा ॥१२४॥ इत्थंसंप्रार्थितस्ताभ्यां चामरी
भ्या मधोक्षजः ॥ नीलाचलो परिभ्रांत ज्योत्स्नाराशि
शुचिस्मितः१२५।मधुरांमधुरालापो वाचमूचे श्रियःपतिः॥

तथास्तु भक्त्यामत्सेवां कुर्वंत्यौ द्वौवराङ्गने ॥१२६॥ वहं-
त्यौ चामरौनित्यं तिष्टतं पार्श्वयोर्मम ॥ इत्युक्त्वा सर्वलोके
शः श्रीपातिः पद्मलोचनाः ॥१२७॥ अन्तर्धानगतो देवैः
पूज्यमानः स्वकंपदं॥तेदेवकन्ये ह्यापि तोदाद्रिशस्य पा
र्श्वयोः॥१२८॥चामरग्राहिणी भूत्वा तिष्टतः पार्वतिसदा॥
एतत्सर्वं तदाज्ञात्वा वैखानस मुनिश्वरः ॥१२९॥ सोपि
तोदाद्रिनाथंत मुपास्तै चिरमव्ययं ॥ विनतायाःसुतःपश्चा
त्पन्नगेशश्च तौमिथः॥१३०॥ संवादेन तपःकृत्वा तोदाद्रौ
सुचिरंततः॥ तत्समीपस्थितिं प्राप्तौ प्रार्थ्यमाना मपीश्व-
रैः ॥१३१॥ एतत्कथा त्वयादेवि श्रुतालोकेर्षुविश्रुता ॥
स्त्रवणा त्पठना त्पापै मुच्यंते सर्वजंतवः ॥१३२॥ इति
गिरितनयायै शंभुनापूर्वमुक्तं निखिलनिगमतुल्यं साधुतो
दाद्रिनेतुः॥ चरितममृतसारं रोमहर्ष्यस्यसूनु र्विगतकलु
षमूचे शौनकंनैमिशस्थं ॥१३३॥ इतिश्रीब्रह्माण्डपुराणे
क्षेत्रवैभवखण्डे तोदाद्रिमाहात्म्ये चामरग्राहीणीकथानाम
सप्तमोध्यायः ॥ समाप्तम् ॥

अष्टमोध्याय प्रारंभ

श्रीमतेरामानुजायनमः ॥ पार्वत्युवाच ॥ देवदेव मा
हाप्राज्ञ कथितं परमं त्वया॥तोदाद्रिस्थल माहात्म्यं पाव
नं शृण्वतांनृणां ॥१॥ मध्येतु पक्षिणामीश स्तपसाप्राप्त

वान्हरेः ॥ सामीप्य मिती चाप्युक्तं तद्वदस्व सुविस्तरात्
॥२॥ शिवउवाच ॥ श्रूयता मभिधास्यामि तार्क्ष्यस्य च
रितंमहत् ॥३ ॥ विष्णोर्लीला वतारेषु तेषु तेषु सुपावनं
॥ चरितंच यथाबुद्धि स्तथातोदाद्रिवैभवं ॥४॥ पुराकृत
युगे देवि काश्यपोभू त्प्रजापतिः॥ अभूतां तस्य पत्न्यौद्वे
कद्रूश्च विनतेतिच ॥५॥ तेतावद्यौवनंप्राप्ते रुपेणाप्रतिमे
भुवि ॥ भर्तारंते महाप्राज्ञे मुनिं प्राप्ते वराङ्गने ॥६॥शु-
श्रूषंत्यौ चिरंभर्तु रूषतु स्तत्समीपतः ॥ कद्रूश्च विनता
चोभे कदाचि त्पितुरंतिकं ॥७॥ गत्वातं देवसंकाशं पि
तरं सत्यवादिनं ॥ नत्वा पुत्रार्थ मब्रूतां आवा मद्यागते
प्रभो ॥८॥ एवमुक्तस्तु पुत्रीभ्या मुवाच प्रहसन्मुनिः ॥
कद्रूनेबहवःपुत्रा जनियन्ति मदोत्कटाः ॥९॥ विनतेवृत्त
संपन्नौ द्वौपुत्रौते जनिष्यतः ॥इत्युक्ते दक्षकन्येते प्राप्य
काश्यप मंदिरं ॥१०॥ तत्रोषतु स्सुखंहृष्टे चिंतयन्त्यौ सु
तोत्सवं ॥ काश्यपोपि महातेजा श्चकारोग्रं तपश्चिरं॥११।
ततःकद्रू र्बहून्नागा न्सुषुवे पन्नगोत्तमान् ॥ तेषां अष्टौ म
हाकाया महाबल पराक्रमाः ॥१२॥ बभूवु र्लोकविख्या
ताः पन्नगाना मधिश्वराः ॥ विनताप्य रुणंपुत्रं सुसुवेलो
कविश्रुतं ॥१३॥ जगती रक्षणार्थंवै सोभव त्सूर्य्य सार
थिः ॥ ततःसमभवत्तार्क्ष्यः प्रणवार्थ स्वरुपभाक् ॥१४॥
शिष्टानां रक्षणंकुर्व न्दुष्टानां शिक्षणेरतः ॥ नानारूपधरो

नित्यं बलवान मितद्युतिः ॥१५॥ तंहरिः कृपयाविष्टो वा
हनार्थं महाबलं ॥ स्वीचकार महातेजाः पुण्डरीके क्ष-
णःपुरा ॥१६॥ पश्चात्स पन्नगागतिः पातालं प्राप्तवांस्त
दा ॥ तंदृष्ट्वा विनतापुत्रं सर्वेसर्पा मदोत्कटाः॥१७॥ न-
नमश्चक्रिरेवंद्यं वंद्यंतममरैरपि ॥ प्रत्युत्थानंच नोचक्रुः को
भवानिति चाब्रुवन् ॥१८॥ किमिहागमनकृत्यंते बंधुःको
वेहवर्तते ॥ कावाजातिः कतमाता कःपिता काचवल्लभा
॥१९॥ एवंते बहुधानिंद्य गच्छगच्छेति चाब्रुवन् ॥ एत
द्वचन नैष्ठुर्यं श्रुत्वा चक्षुश्रवोदितं ॥ २० ॥ हास्यंकृत्वा
खगाधीशो ह्याश्चर्य मितिचाब्रवीत्॥एतेमद्वंशसंभूताः कि
मिदं व्याहरंतिमां ॥२१॥ नजानंति खगाकारं सर्वेमां दू
षयंत्युतं ॥ तथापि ममवंशस्य प्रभावं पन्नगास्त्वमी॥२२॥
शृण्वंतुच यथातत्वं ततोजानन्तुमामिह॥इतिनिश्चित्य म
नसा वैनतेयो महाबलः ॥२३॥ नमस्कृत्वाह नागांस्तान्
वचनं मृदुपूर्वकं ॥ भोभोअजगरा स्सर्वे गोत्रंमे श्रुयता-
मिति ॥२४॥ पिताभे काश्यपः ख्यातः माताच विनता
मम ॥ मातामहस्तु मेदक्षः प्रजापतिरि तिश्रुतः ॥२५॥
विनतायास्त्वहंपुत्रो गरुत्मानिति विश्रुतः ॥ मत्समोना
स्ति त्रैलोके बले वीर्य्ये पराक्रमे ॥२६॥ वाहनंमां श्रियो
भर्तुः पूजयन्तीति साधवः ॥ पाताले मातरं द्रष्टु मागतो
ह मिहाभयः ॥२७॥ युयंमे बांधवाकिंमे युष्माभिर्नकथा

श्रुता॥ममामाता महासाध्वी विनता लोकविश्रुता ॥२८॥
इत्येवं मृदुपूर्वेण पक्षिराजेन भाषितं ॥ श्रुत्वासर्पाः परी-
हासं मुक्त्वा तदूषयन्त्यपि ॥२९॥ पुरान्स्सदनेचेटी च
चारिका किलांगना ॥ सासूतैकं सुतंपंगु मेकंपुत्रंतु पक्षि-
णं ॥३०॥ भाषितं पूर्वकैर्वाक्यं श्रुतमस्ति स्वकैरिति ॥
त्वंचास्मि न्निष्टपदेष्टो ह्यस्माभिर्न कदाचन ॥३१॥ त्वदु
क्तं तत्तथैवास्तु गच्छगच्छेति चाब्रुवन् ॥ ततःतार्क्ष्योपि
गेहंस्वं गत्वा नत्वा स्वमातरं ॥३२॥ दत्तंमाला ततोभु-
क्त्वा भोजनं सुखमास्थितः ॥ तस्मिन्काले महानागा
स्तार्क्ष्यं हंतुं समागताः ॥३३॥ महाबलो महाकायः खगो
भीम पराक्रमः ॥ ज्ञातिस्संहर्तुं कामोसा वस्मानिह स
मागतः ॥३४॥ इत्युक्त्वा दंतशूकास्ते ददंशु स्तंखगेश्व
रं ॥ ततःक्रुद्धेन वैसर्पा वैनतेयेन ताडिताः ॥३५॥ शि
थिली कृतसर्वाङ्गाः केचित्तु मरणंगताः ॥ केचिदूचुः ख-
गाधीशं कोपसंरक्तलोचनाः ॥३६॥ अस्माभि श्चरितेलो
के किमर्थं त्वमिहागतः ॥ कथंच प्रहरस्यस्मान् बलवा
निति गर्वितः ॥३७॥ ततोनन्तो महानागो गरुडं प्रत्य
भाषत ॥ अहं भगवतो विष्णो स्संनिधौ स्थितवानहं
॥३८॥ त्वंचैव संस्थितस्तस्य लोकनाथस्य सन्निधौ ॥त
थैव सततं लोके भविष्यसि समोमम॥३९॥इत्युक्तः का-
द्रवेयाणा मधिपेन महाबलः ॥ पाताला न्निर्गतस्तार्क्ष्यः

श्वेतद्वीप मगात्ततः ॥४०॥ तस्मिन्वृक्षो महानासी न्म-
हाशाखो महोच्छ्रयः ॥ न्यग्रोधः स्थितवानूनस्य शाखा-
यां वेगतःक्षणात् ॥४१॥ आस्थितः सहिधर्मात्मा वैनते
यो महाबलः ॥ छायायां संस्थितास्तस्य न्यग्रोधस्य मु-
नीश्वराः ॥४२॥ बालाखिल्या स्तमुद्वीक्ष्य प्रोचुस्ते तार्क्ष्य
मागतं ॥ पक्षिराज महाबाहो स्वागतंते सुरोत्तमः ॥४३
दत्तमस्माभि रातिथ्यं ग्रहाण पन्नगेश्वर ॥ इतिदत्तं मु-
निश्रेष्ठै बालखिल्यै स्तपोधनैः ॥४४॥ स्वीचकार पतत्री
न्द्रो वन्यंस्वादु फलादिकं ॥ ततोवभाषिरे हृष्टाःपन्नगेन्द्र
मृषीश्वराः ॥४५॥ अमृताहरणार्थंवै गच्छंस्त्वं क्षुत्प्रपीडि
तः ॥ वटस्यैतस्यशाखायां गृहीत्वा गजकच्छपौ ॥४६॥
आगतस्त्वं महावेगात् पुरानिक्षिप्तवानथः ॥ तदाभग्नांच
तांशाखां महती मवनायनः ॥४७॥ सद्यएवगृहित्वात्वं पु
नर्निर्गतवानसि ॥ त्वत्समो बलवान्लोके नास्त्यन्यश्च
तेसमः ॥४८॥ अद्यागतोसि पक्षीन्द्र किमर्थं ब्रुहितत्त्वतः
॥ इत्युक्तो मुनिभिस्सर्वै स्तार्क्ष्य स्संहृष्टमानसः ॥४९॥
नमस्कृत्य मुनीन्सर्वा नुवाच स्वमनीषितं ॥ भवतां द-
र्शनादद्य कृतार्थोस्मि मुनीश्वराः ॥५०॥ लब्धुकामो प्र
सादाद्वो विष्णुनामोप्य मुत्तमं ॥ आगतोस्मि मुनिश्रेष्टा
स्तदुपायश्च कथ्यतां ॥५१ इत्थं संप्रार्थयंतंतं वैनतेयं स
माहितं॥तदामुनीश्वरा स्सर्वेज्ञानदृष्ट्या विचार्य्यच॥५२॥

निश्चित्येदं सुनिष्पन्नं गरुत्मंत मथाब्रुवन् ॥ श्रीपते स्सं
निधौ वासो दुर्लभोहि महीतले ॥५३॥ ब्रह्मादीना मपि
तपः सिद्धानांच दिवौकसां ॥ यज्ञादिकर्मकर्तॄणां कर्तॄणां
च जपंसदा ॥५४। सुलभश्च सदाविष्णु भक्ताना मंडजे
श्वरा ॥ तस्माल्लोके विष्णुभक्तिः कार्य्यासर्वै रिहात्मभिः
॥५५॥ अष्टाक्षरजपश्चैव कर्तव्यो भावितात्मभिः ॥ क-
र्तव्य स्तत्स्थलेवासः पूजनंच सदाहरेः ॥५६॥ दक्षिणस्य
दिशोभागे वर्तते पर्वतोत्तमः ॥ महेन्द्र इतिविख्यातः
सिद्धसंघ स्सुपूजितः ॥ ५७ ॥ तस्य पूर्वोत्तरेभाग
ताम्रपर्ण्यास्तु दक्षिणे ॥ तोताद्रि रितिविख्यातं स्थला
ना मुत्तमोत्तमं ॥५८॥ स्वयंव्यक्तं स्थलं सर्वै र्दैवतैरपि
पूजितं ॥ सेवितं सिद्धगंधर्वै श्चारणै रप्सरोगणैः ॥५९॥
ऋषिभिश्च तपःसिद्धै र्योगिभि र्विजितेंद्रियैः ॥ यतिभिः
सुद्धसत्वैश्च शुद्धांतःकरणैर्नरैः ॥६०॥ सेवितं सर्वतोनि
त्यं ब्रह्मघोषै र्विनादितं ॥ नादितं भृङ्गसंघानां झंकारैः
सन्ततोदितैः ॥६१॥कृष्णेति मधुरां वाणीं व्याहरद्भिः स
मन्ततः ॥ पक्षीशैः पक्षिणां संघै रन्यैश्च बहुभिर्वृतं ॥
॥६२॥ मन्दार पारिजाताद्यै र्दिव्यै र्वृक्षैः सुशोभितं ॥
वापिभिः फुल्लपद्माभि स्तोयपूर्णै स्सरोवरैः ॥६३॥ उद्या
नै र्नन्दनोत्कृष्टै र्बहुभि र्भासितं सदा ॥ देवदुंदुभि नि
र्घोषै रुद्घुष्टं श्रीमतोहरेः॥६४॥ आराधनार्थं सततं दि

व्यरूपे मनोरमैः ॥ सत्रार्थं मागतैः स्सार्द्धं विष्णुभक्तै
विरागिभिः। ।६५।। देशांतरस्थैः सततं सेव्य मानंच दे
शिकैः ॥ संपूर्णं पर्णशालाभिः पूर्णाभिः परमर्षिभिः ॥६६
॥ तस्मिन्कृत्वा तपस्तीव्रं बहवस्सिद्धिमागताः ॥ व्या
सोदधीचि दुर्वासाः शतायुः शतयागकृत् ॥६७॥ कुशा
सनो मुनिश्रेष्ठो वैखानस ॥ मुनीश्वरः ॥ पतञ्जलि स्त
पोराशिः गोमक्राश्च महातपः ॥६८॥ अन्येच बहवोदेवाः
सिद्ध गंधर्व चारणाः ॥ तिष्टं त्यद्यापि कुर्वंतः तपउग्रं मु
मुक्षवः ॥ ६९ ॥ तत्रगत्वा महाक्षेत्रे तपउग्रं समाचर ॥
जपन्मष्टाक्षरस्यत्वं कुरुपक्षीन्द्र योगतः ॥७०॥ तपसा श्री
पतिः प्रीत स्तवाभिष्टं प्रदास्यतिः ॥ गच्छशीघ्रं महाभा
ग तोताद्रिस्थल मुत्तमं ॥७१॥ एवंमुनीनां वचनं श्रुत्वा
ताक्ष्यो महाबलः ॥ नमस्कृत्वा मुनिगणां स्तोताद्रिं मन
सास्मरन् ॥७२॥ निर्गत्य वायुवेगेन समतीत्य नभस्थलं
॥ सेवितं सप्तभिर्वाते श्चारणैश्च महामतिः ॥७३॥ वैखा
नस मुनिश्रेष्ठा यत्रतिष्ठंति शाश्वताः ॥ ऋषयस्तत्र तोता
द्रौ प्रविवेश खगेश्वरः ॥७४॥ तत्रत्या न्समुनी न्सर्वा न्न
मस्कृत्य यथोचितं ॥ पूजितस्तैश्च पूजार्हः पक्षिराजो म
हात्मभिः॥७५॥तत्रतत्र श्रमेपुण्ये वासंकृत्वा विशेषवत्
॥वैखानस मुनेस्तावदाश्रमं प्रविवेशह ॥७६॥तंपूजयित्वा
विधिव त्समुनिं दीप्ततेजसं ॥ स्वकार्यं अवदत्तस्मै वैनतेयो

महाबलः॥७७॥तच्छ्रुत्वा वचनंहृष्टो मुनिर्वैखानसोत्तमः॥
तदेवतस्यो पदिश च्छ्रीमदष्टाक्षरं मनुन्॥७८॥सांङ्गोपाङ्गं
सनिष्ठाकं सरहस्यं सतर्पणं ॥ सद्ध्यानं सतपोहोमं कुरुष्वैवं
यथा विधि॥७९॥इत्येवं मुनिनानेन समादिष्ट स्त्रयीमयः॥
कर्तुंतप समारेभे यथादेशं द्विजेश्वराः ॥८०॥ विषुकालेषु
चस्नानं कुर्व न्विश्वेश्वरंहरीं ॥ संस्मर न्कुंभकेयोगे संस्थि
तोपि जितेन्द्रियः ॥८१॥ प्राणायाम परोनित्यं निरुच्छ्वा
सो महातपाः ॥ संरुध्यच नवद्वारं श्रीमदष्टाक्षरं मनुं ॥
८२॥ जजाप परमोदार स्तारकं सर्वदेहिनां ॥ ततोनारा
यणंदेवंब्रीहिपुच्छाग्र वासिनं ॥८३॥ हेमाभं सूक्ष्म मत्य
र्कं परमात्मा नमव्ययं ॥ ऋतंसत्यं परं ब्रह्म पुरुषं कृष्ण
पिंगलं ॥८४॥ निर्गुणंच निरालंबं निर्विकारं निरंजनं ॥
व्यक्ताव्यक्त स्वरुपंत त्पुण्डरीकाय तेक्षणं ॥८५ ॥ परमं
ज्योतिषां राशिं पंचोपनिषदात्मकं ॥ ध्यात्वाहृत्पुण्ड
रीकस्थं सदासर्वेश्वरं हरिं ॥ ८६ ॥ तार्क्ष्यस्त्वेवं महा
बाहु श्चचार परमंतपः॥ तस्मिन्काले महाघोर मचिन्त्यं
रोमहर्षणं ॥ ८७ ॥ देवाना मसुराणांच युद्धमासी
न्मिथोमहत् ॥ ताडिता समरे तस्मि न्नसुरैस्ते दिवौ
कसः ॥ ८८ ॥ ब्रह्माणं शरणं जग्मु रिन्द्राद्यै र्लोकपा
लकैः ॥ व्यजिज्ञपं स्तदातस्मै दैत्यानां क्रूरकर्मणां ॥८९॥
पराहिंसा विहाराणां दुष्टभावं सुरेश्वराः ॥ श्रुत्वातेषां वचो

वेधा आश्चर्य मितिविस्मितः ॥९०॥ बभाषे निर्जरा न्स
र्वा न्निद्राद्यान सुरक्षतान् ॥ किमर्थं दुर्बला जाता यूयं
पीयूष पायिनः ॥९१॥ हंतते दानवा नष्टा भविष्यंति
सुखोत्तमाः ॥ तद्वयं सन्निधौ विष्णो श्शरणागत रक्षिणः
॥९२॥ गमिष्यामश्च तत्सर्वं वक्ष्यामश्चा सुरैकृतं ॥ इत्यु
क्त्वा तूर्णमुत्थाय स्वयंभू स्सर्वदेवतैः ॥९३॥ वैकुण्ठ भव
नं प्राप यत्रानंत स्सतां गतिः ॥ भ्राजते सूरिभि र्नि
त्यै स्सेव्यमानो दयानिधिः ॥ ९४ ॥ सचसर्वेश्वर
श्श्रीमान् ज्ञात्वादेव समागमं ॥ कैश्चि त्परिजनै स्सार्धं
वेगादग्रे दिवौकसां ॥ ९५ ॥ आविरासी त्सलोकात्मा
कालमेघ इवोत्थितः ॥ तंदृष्ट्वा धोक्षजं हृष्टाः कोटि सूर्यो
दयद्युतिं॥९६॥तुष्टुवु र्लोककर्ताद्या कृत्यंचोचु र्दिवौकसः॥
तच्छुत्वा वचनंतेषां देवानामग्रणीर्हरिः ॥९७॥ बलसंपत्तये
दिव्य माहर्तु ममृतं ययो ॥ तीरंक्षीरांबुधेर्वेगा त्तैश्चसर्वै
स्सहामरैः॥९८॥मथितुंतं सुधांभोधिं योक्त्रंकृत्वातु वासुकिं
॥ मन्थानं कर्तुकामस्सन्मंदरं पर्वतोत्तमं॥९९॥तत्समीपं
गतोदेवै स्तूयमानोजनार्दनः।तमागत मभि प्रेक्ष्य सर्वदाता
र मीश्वरं ॥१००॥ मंदरः पर्वतोहृष्टः प्रोवाचेदं कृतांजलिः
॥ पुरापक्षौ ममस्वामि न्छिन्नौ वृत्रारिणाकृते ॥१०१॥
युगेतस्मा न्नशक्नोमि ह्युत्थेतुं धरणीतलात् ॥ उधृत्यमां
महाबाहो मंथानं कुरुमांचिरं ॥१०२॥ तथेतिदेवताःसर्वे

समुद्धर्तु न्तमुद्यताः ॥ नाशक्नुवं सदाहेश तार्क्ष्य स्त्वा
हूयतामिति ॥१०३॥ तच्छुत्वा वचनंतस्य मधुहन्तु स्सु
रोत्तमः पाताले तार्क्ष्यमन्विष्य पुनरागत्य चाब्रुवन् ॥
१०४॥ स्वामिन्रूपैं मिथः कृत्वा सम्वादं कारणान्तरे ॥
त्वत्समीपे सदावासं सर्वेषां मुनिदुर्लभं ॥१०५॥ कांक्षं
स्तार्क्ष्य स्तपः कर्तुं तोदाद्रा वतिपावने ॥ गतवानिति
नोज्ञातं यथेष्ठं कुर्वतः परं ॥ १०६॥ इत्थंदेवै स्समाकर्ण्य
प्रोक्तं पद्मेक्षणोहरिः॥ अहमेव गमिष्यामी त्युक्त्वाऽह्वाने
गरुत्मतः ॥१०७॥ वर्तते यत्रपक्षीन्द्र तत्रैवाविरभूत्क्ष
णात् ॥ स्तूयमान स्सुरेन्द्राद्यै र्देववृंदै सचारणै ॥
१०८॥ अथेशं सर्वलोकानां रक्षितारं दिवौकसां ॥ भ
र्तारं कमलापृथ्व्यो रिंद्रनीलो ज्वलश्रियं ॥१०९॥ तप्त
हाटक केयूर कटिसूत्रो पशोभितं ॥ चन्द्रहासो
ज्वलं श्रीम न्मुक्ताहार वीराजितं ॥ ११० ॥
श्रीवत्स लांछिनं वक्षो बिभ्राणं कमलेक्षणं ॥ तदात्वो
ल्लिखितोन्निद्र विद्रुमाधर सौष्टवं ॥१११॥ दूरीकृताखिल
ध्वांतं मंदहासां कुरश्रिया ॥ तन्मध्ये स्तोकदृश्याच्छै र्द्वि
तैरुद्भासितास्यकं ॥११२॥ शिखरी भूत नासाग्रं नूतनां
भोजलोचनं ॥ बिभ्राणं कुंतलं नीलं जीमूतो ल्लासहा
रिणं ॥११३॥ किरीटं सर्वलोकाना मीश्वरत्वा भिसूचकं
॥ बहंतमहतां राशिं महता मभयं करं ॥११४॥ संख च

क गदा शार्ङ्ग नंदकाद्यै र्वरायुधैः ॥ समेतं सर्वभूताना
मंतरात्मा नमव्ययं ॥११५॥ श्रीमन्तं संश्रितत्राण प्रवी
णं प्रणवात्मकं ॥ दर्शनीयं परंज्योतिः परमं धाम संस्थि
तं ॥११६॥ वरदं सर्वभूतानां वंदारु सुरशाखिनं दृष्ट्वासर्वे
श्वरं विष्णुं पुरस्ताद्धि नतासुतः ॥११७॥ संमोदवश मा
पन्नो बाष्प संपूर्ण लोचनः ॥ पुलकांकुर संदोहै र्दृश्यमा
ना खिलां गकः ॥११८॥ प्रणम्य शिरसा भूयो भूयो भू
यः प्रणम्यच ॥ स्तुत्वा श्रुतिभि रग्र्याभिः श्रुतिसिद्धा
भि रप्रतः ॥११९॥ भूतले निपपाताथ चरणौ शिरसा
वहन् ॥ ततस्तं पुण्डरीकाक्षः कृपया भक्तवत्सलः॥१२०
॥ भूमौ निपतितं तार्क्ष्य मुत्थाय पुरुषोत्तमः ॥ बाहुभ्यां
पीनवृत्ताभ्या मुवाच प्रहसन्वचः ॥१२१॥ तपसाते सुसं
तुष्टो दास्यामि वरमीप्सितं ॥ नत्यक्ष्यामि कदाचित्त्वां
सन्निधे र्ममसुव्रत ॥१२२॥ प्राप्तोमद्वाहनत्वंच किमतः
परंवरं ॥ इदंविष्णो र्वचःश्रुत्वा कृपयोक्तं खगोत्तमः ॥
१२३॥ बद्धांजलि पुटःप्रीतः प्रत्युवाच शुभंवचः॥स्वामिं
स्त्व त्सांन्निधौवृतिं देहिमे पुरुषोत्तम ॥१२४॥ मद्गुरोश्चव
रंदातु मर्हसित्वं यथेप्सितं ॥ तथैवास्तु वयः श्रेष्ठ नित्यं
मत्सान्निधौवस ॥१२५॥ त्वद्गुरुश्च ममोपासन्नो देहात्पूर्वं म
हातपाः॥ वैखानस इतिख्यात स्तमप्यानय सत्वरं ॥
१२६॥ इत्युक्तस्तं महावेगः पन्नगारि र्मुनिश्वरं ॥ स्वा

मिन्पृष्ठे समारोप्य वेगादागा त्खगोत्तमः ॥१२७॥ त
तोवैखानसो विष्णुं सर्वदेव र्नमस्कृतं। दीर्घबाहुं विशा-
लाक्षं कोटिसूर्यो दयप्रभं ॥१२८॥ श्रुतिभि स्तत्वरूपा
भिर्वंद्यम न पदां जं ॥ श्रीवत्स वक्षं श्रीमत्कौस्तुभेन
विराजितं ॥ २९॥ वनमाला धरं सद्यः प्रफुल्ल कमलेक्ष
णं ॥ भूषितंच गुणैरृद्धि रानन्दाद्यै रनन्तकैः ॥१३०॥
श्रीमन्तं श्रीपतिं पुंसां भवता पार्ति हारिणं ॥ प्रभया
नन्यया सर्वा भासयंतं दिशः स्वया ॥ १३१ ॥ श्रीखं-
ड कर्दमो ल्लास स्पर्धिभिः शीतलैःसतां ॥ कटाक्षै री-
प्सितार्थानां दातारं दीनकल्पकं ॥१३२॥ चिन्मयं नि
र्गुणं शांतं निर्विकारं निरंजनं ॥ परम ज्योतिषां राशिं
परमात्मान मव्ययं ॥१३३॥ असमाभ्यधिकं तत्वं श्री-
वैकुण्ठ निकेतनं ॥ क्षीराब्धि शायिनं श्रीशं सर्वेशांस-
र्वशोषिणं ॥१३४॥ दृष्ट्वा नत्वा चिरं मग्न आनन्दाब्धौ
महामनाः ॥ स्तुत्वा ततस्तु वेदोक्तैः सूक्तैः तस्थौ
तदग्रतः ॥१३५॥ वैखानसो मुनिश्रेष्ठो भावयं स्तत्पदां
बुजं ॥ ततःप्र सन्नो भगवा न्भक्तवात्सल्य वारिधिः ॥
१३६॥ प्रोवाच कृपयाविष्ट स्तंऋषिं तपसां निधि ॥
दास्यामि तव सुप्रतो वरंवरय सुवृत ॥१३७॥ कृतार्थो
सि मुनिश्रेष्ठ तोदाद्रिस्थल वासतः ॥ तच्छ्रुत्वा वचनं
विष्णो मुनिर्वैखानसोत्तमः ॥१३८॥ भगवन्मुक्तिमद्ये

व प्रार्थये पुरुषोत्तम ॥ दद्त्वा मद्विकर्तव्या कृपा सर्वा
त्मना हरे ॥१३९॥ इत्युक्त्वा सन्निधौ तस्य साष्टाङ्गं प्र-
णनाम सः ॥ इत्थं स प्रार्थितस्तेन मुनिना श्रीपतिस्तदा
॥१४० प्रोवाच परमोदारः प्रीतः प्रीतेन चेतसा ॥ तथै
व भक्ता ग्राम श्रुयतां कारणं तव ॥१४१॥ भूलोके जन्म
नो विद्धं नित्याहं भगवान्हरिः ॥ अर्चारूपेण लोकेस्मि
न्ग्रामेवा नगरे वने ॥१४२॥ तीर्थे नद्यास्तटे चैव ग्रहेवा-
गिरिमूर्धनि ॥ वसामि यत्र्यत्राहं तत्सर्वत्र सर्वदा
॥१४३॥ पुजितुं मां मुनिश्रेष्ठ पूर्वं पैलादिभिर्युतः ॥
जनितस्त्वं महाभाग तस्मान्मामर्चयानिशं ॥ १४४ ॥
बहूनीहं युगानित्वं मंतेमोक्ष मवाप्स्यासि ॥ इत्युक्त्वा ग
रुडारुढो देवसंघैः परिवृतः ॥१४५॥ शीतली कृतगात्र
स्स न्पुष्पवर्षैर्दिवौकसां ॥ स्तुयमानो मुनिगणैः सनका
द्यैश्च योगिभिः ॥१४६॥ ब्रह्मेशानादिभि स्साद्धः पूज्य-
मानः सुरर्षिभिः ॥ आहृत्य मंदरं तार्क्ष्या दमृतो न्मथ
नायतु ॥१४७॥ तीरंक्षीरांबुधेः श्रीमान्प्रययौ पुरुषोत्तमः
॥ इत्थंतार्क्ष्यो भजाद्विष्णोः सन्निधौ सर्वदास्थितिः
॥१४८॥ देवितस्यैव कृपया तद्गुरुश्च महानृषिः ॥ पूज
यश्चापि धर्मात्मा तमर्चारूपिणं हरिं ॥१४९॥ उवाच प्राप्त
वानायु र्दीर्घंलोकेचिरंसुखी ॥ इत्युक्तं शंभुना पूर्वं पा-
र्वत्यै रोमहर्षण ॥१५०॥ कथयामास धर्मात्मा शौनका

द्या नृषीश्वरान् ॥ इतिश्रीब्रह्माण्डपुराणे-क्षेत्रवैभवखण्डे तोदाद्रिमाहात्म्येगरुडप्रत्यक्ष वैखानसार्चनाया ज्ञप्तिविधि र्नामाष्टमोध्यायः ॥ समाप्तं ॥

नवमोध्याय प्रारंभ

श्रीमतेरामानुजायनमः ॥ इत्थं सूतोदितांश्रुत्वा वाचंप्राज्ञो मुनिश्वराः ॥ प्रत्युचु श्शौनकाः पृष्टाः पूरिताः परया मुदा ॥१॥ त्वतःश्रुतं रहस्यानां रहस्यं परमाद्भुतं तोदाद्रेश्चरितं दिव्यं पावनं रोमहर्षणं ॥२॥ तथापि किंचि द्वक्ष्यामो सावधान मनाःशृणु ॥ आदित्य चंद्रमाश्चैव प्रकाशेते किलस्वयं ॥३॥ तयोर्लोक प्रकाशत्वं केनप्राप्तं तपोधन ॥ केनवा वसतिःप्राप्ता नित्यंविष्णोस्तु सन्निधौ ॥४॥ कस्मात्प्रीतिस्तु संजाता तयोर्लोक प्रकाशयोः ॥ एतद्विस्तर तोविद्व न्वक्तुमर्हसि नोमुने ॥५॥ इतिसूतो मुनिन्द्राणां प्रार्थना पूर्वकंवचः ॥ श्रुत्वास भक्तिमान्सूतो मुनीन्द्रा निदमब्रवीत् ॥६॥ श्रूयता मुनिशार्दूला महदाश्चर्य कारणं ॥ पावनं सर्वलोकानां तोदाद्रिस्थल वैभवं ॥७॥ सूर्य्या चन्द्रमसो रद्य चरितं परमाद्भुतं ॥ इत्युक्त्वा समुनी न्सूतो नमस्कृत्वा जनार्दनं ॥८॥ देशिकं व्यासमन्याश्च शुकादि मुनिसत्तमान् ॥ उवाच परमप्रीतः शौनकादी नृषीन्प्रति ॥९॥ विष्णौच

तत्पुराणेषु तदीयेषु विशेषतः। भक्तियुष्मासु चैवेहनान्यत्र जगतीतले ॥१०॥ दूषयंति पुराणानि हसंते परिहासतः ॥ तत्कथासु च विश्वासं येनकुर्वंति मानवाः ॥११॥ तेषां यावच्छशीभानुस्तावद्वासस्तु रौरवे॥ इत्थंव्यासेन शप्तं हि गुरुणाममशौनकाः॥१२॥ तद्युयंभक्तियुक्तास्तु शृणुध्वं कथितंमया ॥ पुराणश्रवणेभक्ति र्युष्मास्वेव मुनीश्वराः॥ १३॥ वसन्तु नैमिशारण्ये नास्तिको नाहिकश्चन॥ गुह्या द्गुह्य तरंवक्ष्ये श्रूयतां सावधानतः ॥१४॥ पूर्वार्थं मदितिः पूर्वं माघस्नानं ऋषीश्वराः ॥ चकार द्वादशसमा स्तत्तन्मासि वरांगना ॥१५॥ कुर्वंती पुण्यकर्माणि तत्तत्काले विशेषतः॥ पूजामतिथि पूजांच प्रत्येकं सातपस्विनी ॥ १६॥ पुराण श्रवणादीनि गुरुशुश्रुषणं तथा॥ कीर्तयन्ता हरेर्नाम ध्यायन्ती तत्पदांबुजम् ॥१७॥ श्रीमदष्टाक्षरी मन्त्रं जपन्ती तत्परायणा ॥ एवंसा द्वादशसमा माघस्नानं चकारह ॥१८॥ ततस्त त्पुण्यपाकेन त्रयस्त्रिंशदारिन्दमान्॥ देवां स्त्वजनयद्देवी शोभने दिवसेतदा ॥ १९॥ तेषु सर्वेषु देवेषु पुष्पवन्तो महाद्युती॥ तपसा महतासूर्यो द्वादशात्माबभूवह॥२०॥ शक्तिभि स्तावतीभिश्च संयुक्तो भूत्प्रभाकरः॥ प्रकाशय न्स्वयादीप्त्या नभश्च प्रथिवींदिशः ॥२१॥ सर्वेदेवाश्च तस्याग्रे प्रादुर्भूताभवन्तिहि॥ चंद्रोपि तपसायुक्तो मूर्तिं षोडश भागिनीं॥

२२॥ सुधामयी मथप्राप्तो लोकानां जनयन्मुदं ॥ चचा
र शीतलो भूत्वा रात्रौरात्रौ प्रकाशते ॥२३॥ एतस्मि न्न
न्तरे वेधास्त्वसृजद्वै प्रजापतीन् ॥ तेषु दक्षइतिख्यातः
प्रजापति रभून्महान् ॥२४॥ तस्यप्रजापते रासन् चतुष्ष
ष्टि कुमारिकाः ॥ ताकन्या यौवनंप्राप्ता रूपेणा प्रतिमा
भुवि ॥ २५ ॥ देवेभ्यो ह्यददाद्दक्षो वध्वर्थेप्रीतमानसः ॥
सतीनामततःपुत्री तस्यतेपेमहत्तपः ॥२६॥ उपयेमेच तां
शंभुः प्रसन्नोभगवान्सतीं ॥ दक्षप्रजापतेर्वैरं कदाचिच्छं
करेजनि ॥२७॥ वर्तमानेचतद्वैरे दक्षोयज्ञसमारभत् ॥
वर्तमानेक्रतौतस्मि न्द्रष्टुकामाः समागताः ॥२८॥ आदि
त्या वसव स्साध्या अश्विनौ मरुतांगणाः ॥ ऋषयश्च म
हात्मानो देवसंघा स्सचारणाः ॥२९॥ सिद्धा विद्याधरा
श्चैव पितरो मनवस्तथा॥ आहुतास्तेन दक्षेण समवेताः
सहस्रशः ॥३०॥ समेत्य तेसभामध्ये प्रजापति मथाब्रुव
न् ॥ दक्षप्रजापते विद्ध रुद्रभागोनदास्यते ॥३१॥ यदि
त्वयां महादोष स्संभविष्यतिनस्ततः ॥ वाक्यंतेषां अना
दृत्य दक्षकर्माण्यकारयत्॥३२॥ तद्वृत्तज्ञापनार्थाय नारदो
थ महामुनिः॥ कैलास मगमद्वेगा त्प्रीतिसंहृष्टमानसः ॥
३३॥ तंदृष्ट्वा शंकरंस्तुत्वा सन्निधौ तस्यसंस्थितः॥ नाना
विधाः कथादिव्याः कथयामास नारदः ॥३४॥ तन्मध्ये
दक्षयागस्य प्रवृत्तिंच न्यवेदयत्॥ दक्षप्रजापतिर्यज्ञं त्वद्वै

रा त्कुरुतेप्रभो॥३५॥त्वद्भागंच नदास्यामी त्युक्तवां स्त्व
धिरोषितः ॥ देवोपि वचनंश्रुत्वा क्रुद्धोथ त्रिपुरांतकः ॥
३६॥ प्रहस्यपरमामर्षी प्रोवाच मुनिपुङ्गवं ॥ व्रतेषु बालिहो
मेषु सप्ततंतुषु कर्मसु ॥३७॥ आगमेषुच सूत्रेषु वेदेषु वि
हितंयथा ॥ तथाकरोति मतिमा नन्यथा विफलोभवेत्॥
॥३८॥ तत्फलं भूंजतेदेवाः कथंतद्भाग भागिनः ॥ तथै
वतेना वमता यास्यांतिच यथागतं ॥३९॥ तद्वृत्तश्रवणे-
नालं देवर्षेभजमौनतां॥ इत्युक्तश्शंभुनातेन देवार्षि र्ना
रदस्ततः ॥४०॥ विष्णोर्लीलावतारेषु यानिकृत्यानीदेहि
नां ॥ पापघ्नानि पवित्राणि तान्यगायत सैमुनिः ॥४१॥
तस्मिन्काले सतीनाम दुहितासत्यवादिनी ॥ दक्षप्रजा
पतेस्तस्य प्रोवाच वचनंशिवं ॥४२॥ दृष्टुमिच्छामि देवे
श क्रियमाण महंप्रभो ॥ पितामेकर्मठिनाद्य त्वमाज्ञापय
मामिति ॥४३॥ देवीवाक्यं ततःश्रुत्वा कोपरक्तेक्षणःशि
वः उवाच वचनं किंचि दुच्चैर्देवीमूमाप्रति ॥४४॥ मद्वेषी
मत्परित्यागी निर्मर्यादोविमूढधिः॥ दक्षःप्रजापतिर्यज्ञं कु
रुतेयदिभामिनि॥४५॥ तंदृष्टुं तत्रगंतुंच नोचितात्वं वरा
नने॥उक्तापि शंभुनैवंसा चापल्या दगराट्सुता॥४६॥त्रि
नेत्रं रोषताम्राक्षं यास्यामी त्याहशूलिनं ॥तथैवास्तु माहा
भागेगच्छेत्युक्ताथशूलिना॥४७॥जगामतस्ययागेतुमातरं

पितरंचसा ॥ मातुलं बंधुवर्गांश्च नमस्कृत्वा यथाविधीः
॥४८॥ तस्थौतत्रसभामध्ये सर्वैर्देवैश्च पूजिता ॥ एत
स्मिन्नन्तरे दक्षो गर्वेणादूषयच्छिवं ॥ ४९॥ तामसः प्रे
तसंघेशः प्रेतभूमौ वसन्सदा ॥ अस्थिमाला धरश्चर्म
वसाने धारयन्जटी ॥५०॥ भूतप्रेत पिशाचाद्यैः सुवृतो
रक्तमूर्ध्वजः ॥ कपाली शूलपाणिस्तु नटउन्मादकोजडः
॥५१॥ तस्मैमूढाय मेपुत्री मज्ञानाददर्दपुरा ॥ इयंचम
त्सुताद्रष्टुं यागंनार्हतिवैसुराः ॥५२॥ एवमुक्त्वा सुरान्द
क्षः स्वांसुतां चेदमब्रवीत् ॥ गच्छाद्यैव सुतेकस्मादना
हूतात्वमागता ॥५३॥ नहिसंभाषितुंयोग्या तद्भार्यात्वं
सतिमम ॥ इतिक्रुद्धस्य दक्षस्य वचस्स वैसुरेश्वराः ॥
५४॥ शंभुदूषणसंयुक्त मंगीकृत्य स्थितास्तदा ॥ ततः
श्रुत्वा सभामध्ये पितृवाक्यं सतीतदा ॥५५॥ कोपात्सं
घूर्णमानाक्षी स्वाश्चाहपरिचारिकाः॥ मागास्त्वं तत्सभाम
ध्य मितमामवदत्किल ॥५६॥ भर्तुर्वाचमतिक्रम्य ह्या
गतायास्त्विदंफलं ॥ ममप्राप्तमिदंत्वद्य प्रायश्चित्त मभू
त्किल ॥५७॥ इतिकोपा त्समाहूय निवर्त्यचसखीजन
॥ कैलासमगमद्वेगा त्तद्वृत्तंच निवेदयत् ॥५८॥ तच्छ्रु
त्वा शंकरः क्रुद्धो जटांभूमा वताडयत् ॥ तत्क्षणा द्वी
र भद्रोभू त्सहस्रभुजसंयुतः ॥ ५९॥ रक्ताक्षो रक्तवस्त्रश्च
रक्तचन्दनरूषितः ॥ रक्तभाजनहस्तस्स न्रक्तमाल्यैरलं

कृतः ॥६०॥ खड्गान्सखेटकांस्तीक्ष्णा न्धारयन्वैकरेकरे ॥
एवंनानायुधोपेतो रुद्रकोपाग्निसंभवः ॥६१॥ क्रुद्धंशिवं
नमस्कृत्य किंकर्तव्यंमयाधुना ॥ इतिप्रार्थयमानंतं वीर
भद्रमथाब्रवीत् ॥६२॥ कालाग्निरिवकोपेन प्रज्वलन्वैस
तीपति ॥ वीरभद्रमयादिष्टो गत्वादक्षप्रजापतेः ॥६३॥
सत्वरंयज्ञशालायां शिक्षयत्वंतमोजसा ॥ इत्युक्तो वीरभ
द्रस्तु वहुभिश्चकिरातकैः ॥६४॥ म्लेच्छैश्च यवनोान्मिश्रै
स्ताम्रवक्त्रैश्च संवृत ॥ वीरभद्रोथ गत्वाशु यागशालां प्र
जापतेः ॥६५॥ आवाह्यचसुरान्सर्वा न्यूपानुन्मूलयन्तदा
॥ स्रग्भांडांश्च विभेदाशु पूरयामासपांसुभि ॥६६॥ अ
ग्निकुण्डंच वेदींच भित्वाविद्रावुऋत्विजः ॥ चिच्छेदरो
षित शीर्षं दक्षस्याशुप्रजापतेः ॥६७॥ दुर्वासप्रमुखान्वृ
द्धान् स्मश्रुनुत्पाट्यवैततः ॥ दुद्रावच सरस्वत्या नासि
कामाच्छिन्नहूली ॥६८॥ सूर्याचन्द्रमसोश्चैव दन्तानुत्पा
ट्यवैबलात ॥ शेषान्विद्रावयामास वीरभद्रोमहाबलः ॥
६९॥ ततोरुद्रोमहद्रूपं कृत्वातास्मिन्महाबलः ॥ आविरासी
दमेयात्मा ह्यग्निकुण्डा प्रजापतेः ॥७०॥ तंदृष्ट्वा रूपम
त्युग्रं कालाग्निसमलोचनं ॥ वहंतंशूलमाताम्रं कालदं
ण्डोपमंमहत् ॥७१॥ भीषणं भूषणैस्सर्पैं र्भूषितं भुवने
श्वरं ॥ सर्वेदेवर्षिसंघास्ते भीतभीताः पलायिताः ॥७२॥
तास्मिनवसरेभीतो ताडितोचविशेषतः ॥ पलायमानो

सहसा चन्द्रसूर्यौ सुरोत्तमौ ॥७३॥ दृष्ट्वाततः स्वमाचार्य्यं बृहस्पतिमथोचतुः ॥ शरणं भवनोविद्ध न्भीतयोस्त्रिपुरा न्तकात् ॥७४॥ अथवारक्षकोयस्तु सर्वेषांतं वदस्वनः॥ इतिसंप्रार्थितोदेव श्चन्द्रसूर्य्यौ वथाब्रवीत् । ॥७५॥ स र्वेषां भवभीताना मार्तानांच दिवौकसां ॥ रक्षकस्सर्व दाश्रीमान् चन्द्रसूर्य्यौ वधोक्षजः॥७६॥ हिरण्यकशिपो र्दैत्या त्प्रल्हादोरक्षितः पुरा ग्राहग्रस्तंगजेद्रंच ररक्षजगती पतिः ॥७७॥ अन्यांश्चवहुलान्लोके महतोविश्वभावनः ॥ तस्माद्युवां महींप्राप्य शरणंविष्णुमव्ययं ॥७८॥ इ त्युक्तौतौसुरश्रेष्ठौ चन्द्रसूर्यौ मुदान्वितौ ॥ गुरुणा तत्त थैवेति गतौकर्तुं तपश्चिरं ॥७९॥ तत्रतत्रस्थलपुण्य तीर्थेस्नात्वा विशेषतः ॥चरंतौचन्द्रसूर्यौतौ क्रमात्तौताद्रि मीयतुः ॥८०॥ ततस्तौ तस्समासाद्य मनोज्ञंसर्वदंशुभं ॥ सिद्धचारणगंधर्वै स्सेवितंपरमार्षिभिः ॥८१॥ शुद्धं शुद्धि करंनृणां सर्वेषा मर्थदायकं ॥ निर्वैरैःसततंयुक्त म न्योन्यंमृगपक्षिभिः ॥ ८२ ॥ फलमूलां बुकाष्टाभिः संपू र्णपादपैरपि ॥ एतत्क्षेत्रेतपःपुण्ये करिष्यावस्सुघोषितौ ॥८३॥ इतिनिश्चित्यमनसा पुण्यवंतौ महाद्युती ॥ कुरु तस्तौ महारंभं तप्तुंकालतपोर्जितं ॥८४॥ ब्राह्मेमुहूर्तेचो त्थाय ध्यात्वादेवंजनार्दनं ॥ शरीरशुद्धिं कृत्वाथ दन्तधा वनपूर्वकं ॥ ८५॥अनुष्टानंच कृत्वातौ जप्त्वाचपरमंजपं

॥ श्रीमदाराधनंविष्णो रतिथीनांच पूजनं ॥८६॥कृत्वा
जितेन्द्रियौ विष्णो श्चरणाब्जैकधारकौ ॥ इत्थंतौ प्रत्यहं
देवौ चरतस्मोत्तमंतपः ॥८७॥ तीर्त्वातौ सुबहून् कालां
स्ततस्संशुद्ध मानसौ ॥ सर्वदासन्निधौ विष्णो रीहमानौ
स्थितिपरां ॥८८॥ पर्णाशनौ पुराभूत्वा तोयाहारौततःप
रं ॥ वायुभक्षौच तौपश्चा न्निरुच्छ्वासौ बभूवतुः ॥८९
चिरमेवं तपःक्रूरं कुर्वतोश्चन्द्रसूर्ययोः ॥ प्रादुरासीदमेया
त्मा तयोरग्रेसतांगतिः॥९०॥दिव्यचामरहस्ताभि दिव्य
नारीभिरास्थितं ॥ वीज्यमान मुदारेण हारेणभ्राजितोर
सं ॥९१॥ तप्तहाटक केयूर कटकोल्लास भासितं ॥ वा
सितंबनमालानां श्रेणिभिः श्रीपदांबुजं ॥९२॥ श्रीवत्स
कौस्तुभोपेतं दिव्यःश्रीखंडकर्दमैः ॥ लिप्तवक्षस्तु वि
भ्राणं कंबुग्रीवं सुनासिकं ॥९३॥ रक्षणेनैवसर्वेषां दत्ता
भय मधोक्षजं ॥ कीरीटिं सर्वलोकाना मैश्वर्यद्योतकं श्रि
यं ॥ ९४ ॥ वहंतं कुंतलं लीलं नीलकंठो त्करच्छविं ॥
कांचीरत्नप्रभा पूरै रुत्तरंगीकृतोदरं ॥९५॥ श्रीमतापां
चजन्येनराजितंदक्षणेतरं ॥ चक्रराजेनचदीप्तं दक्षिणंच
करंसदा ॥ ९६ ॥ बिभ्राणं पुण्डरीकाक्षं पुण्यभाजांसु
दर्शनं ॥तपसा मूर्जितं राशिं तपोमूर्तिं तपात्मकं ॥९७॥
तपःफल प्रदातारं भर्तारं जगतामपि॥आर्जवौदार्य सौशि
ल्यैः स्थैर्यं गांभीर्य मार्दवैः ॥ ९८ ॥ राजंतं भानुभिः

स्थानं सहस्रै वंद्दुभिर्यथा ॥ वंद्यमान पदांभोजं वंदारु भि रनेकधा ॥९९॥ श्रीमद्भि र्देवतावृन्दैः सिद्धसंघ मु नीश्वरैः ॥ योगिभिः सनकाद्यैश्च साध्यै सर्वाधिकंप्रभुं॥ १००॥ श्रिनानां कल्पकंशौरि श्रीपाति पुरुषोत्तमं॥ श्रीम न्तंतं गरुत्मन्तंतं समारूढं जगत्पतिं॥१०१॥सर्वं सर्वेश्वरं विष्णुं दृष्ट्वातौ चंद्र भास्करौ ॥ संभ्रमा दुस्थितौ तूर्णं वाग्यतौ संयतां जली॥१०२॥ स्तुत्वा स्तुतिभिरग्र्याभिः श्रुतिसिद्धाभि रीश्वरं ॥ तस्थतुः पार्श्वतः प्रह्वौ वीक्षमा णौ सदाहरिं ॥१०३॥ तावुवाच महाबाहुः प्रसन्नो भ गवान् हरिः॥ चन्द्रसूर्यौ युवामद्य वीरभद्रकृतंभयं॥१०४ त्यज्यतां मत्समिपेच कर्तव्याच स्थितिस्सदा ॥ मदाज्ञ याच्च लोकेस्मि न्दिवारात्रि प्रकाशकौ ॥१०५॥ भवतं सौम्यरूपेण रात्रौचन्द्रोदिवारविः॥ क्रूररुपेण वैनित्यं एवं भूतौ विराजतं॥१०६।युवयोरन्तराविष्टा श्चन्द्रसूर्यौ महाद्यु तिः॥लोका न्प्रकाशयिष्यामि अण्डमेवंनसंशयः॥१०७॥इ त्थं दत्वावरं श्रीमान्श्रीवैकुण्ठं ययोहरिः॥ब्रह्माद्यै र्लोकपा लैश्चासिद्धसंघैस्सुरोत्तमैः॥१०८॥स्तूयमानोथ योगिन्द्रैश्श नकाद्यै र्जनार्दनःएवमादि सुहृच्छ्रेष्ठ भक्तानांभक्तवत्सलः ॥१०९॥हरिरेव गतिःसत्यं वदाम्यहं ऋषीश्वराः॥गजेंद्र द्रौ पती चैवगंगाधरमथार्जुनं॥११०॥अपालयदिहैवेश स्त्वन्यां श्चपुरुषोत्तमः॥तस्मात्सर्वेषु कालेषु प्राप्य स्सर्ववपुष्मतां॥

१११॥ हरिरेव परंब्रह्म श्रीपतिः कमलेक्षणः ॥ अज्ञोवा
बुद्धिमान्वापि हरिभक्त्या युतःपुमान् ॥ ११२॥ सपूना
तिजगत्सर्वं विष्णुलोकं सगच्छति इतिश्रीब्रह्माण्डपुराणे-
क्षेत्रवैभवखंडे तोताद्रिमहात्म्ये चन्द्रसूर्ययोःप्रत्यक्षोनाम
नवमोऽध्ययः॥समाप्तम्

दशमोध्याय प्रारंभ

श्रीमतेरामानुजायनमः

सूतवक्त्रेन्दु गलितां पीत्वा विष्णु कथासुधां ॥ शौनका
द्या मुनिश्रेष्ठा नैमिशारण्य वासिनः ॥ १ ॥ नतृ-
प्तास्तु ततस्सूतं वचनं चेद मब्रुवन् ॥ सूतसर्वपुराणज्ञ
पुराणार्थ विचक्षण ॥२॥ श्रृण्वतां पठतांचापि तत्तत्सं
बंधिनामपि ॥ पवित्राणि परंनृणां पापघ्नानी विशेषतः॥
३॥ त्वत्तःश्रुतानि सर्वाणि पुराणानि महामुने ॥ भव्या
नि भवतापार्तिं च्छेदनानि मनीषिणां॥ ४॥ तेषामपि म
हातेजाः स्थलानां वैभवानिच॥ तन्मध्ये परमंपुंसां परमा
र्थैक चेतसां॥५॥ भक्तिदं मुक्तिदं विद्धं स्तोताद्रि स्थ
लवैभवं ॥ श्रुतंयत्किंचि दस्माभि रङ्गत्र द्रोमहर्षणे॥६॥
ततोवक्तव्य मस्माकं विस्तरेण त्वयानघ ॥ केनामु न्नै
मिशंनाम वनस्यास्य महामते ॥७॥ तोदाद्रौ रोमश
स्तस्मिन् किमर्थ मकरोत्तपः॥ तत्क्षेत्रे वैष्णवंधाम स्वय
माविरभूत्कुतः॥८॥ तद्धाम परमंविष्णोः कथंदृश्यं बभ

वह ॥ केवातत्र तत्रस्मिन्द्धा: केवाति ष्ठन्ति सर्वदा ॥९॥ तत्स्थलं विपिनंपूर्वंआम्रारण्य मितिश्रुतं ॥ केनाभू न्न गरंदिव्यं श्रीवैकुण्ठोत्तमंमुने ॥१०॥ विस्तरा न्नोमु निश्रेष्ठ वक्तव्यं ह्येतदद्भुतं ॥ इत्युक्त्का शौनकपृष्ठा स्सू तंसर्वार्थवादिनं॥११॥मुनयोमौनमासेदु स्तोतुकामस्तदद्भु तं ॥ सूतउवाच: ॥शौनकाद्या मुनिश्रेष्टा स्तत्वरुपां क थामिमां ॥१२॥ तोदाद्रिप्रभवांदिव्यां नदीमिवसुनिर्म लां ॥ वक्तुमेतत्वत: प्राज्ञा: शृणुध्वं सावधानत: ॥१३ पुराकृतयुगेमुख्ये स्थले पुष्करनामके ॥ मुनिना मुत्त मोविद्वा न्तत्वज्ञानी महामुनि: ॥१४॥ दीर्घरोमाति वि ख्यात स्तपस्तेपेविगत्पर्गंतास्मिन्न्नसंरतास्मिन्नागता मुनि सत्तमा:॥१५॥अन्योन्यंसंवदतस्तेतत्वेतत्वार्थकोविदा:॥ म रीचि: काश्यपो मौग्लो भृगु: कात्यायनोंगिरा:॥१६॥जा बालि गालव कन्वा दधीचि नारदोरवि: ॥ अन्येच ब हव:शिष्यै र्बहुभि र्ब्रह्मवादिन: ॥१७॥ उटजं दीर्घरोमा स्ते समवेता स्समायस्तु:॥ ततस्ता न्तपसावृद्धा न्वयसा च मुनीश्वरान् ॥१८॥ दीर्घरोमा मुनीन्दृष्ट्वा समुत्तस्थौ कृताजलि:॥ उवाचच सतांप्रीत्या स्वागतं वस्तपोधना: ॥१९॥ ततस्ते दीर्घतपसो दीर्घरोम्णा मुनीश्वरा: ॥ पू जितास्तु यथान्यायं संवादं चक्रिरेमिथ: ॥२०॥ केचि त्तु पृथिवींतत्वं केचिदाप ऋषीश्वरा: ॥ केचिद्धींच

वायुंच केचिदाकाश मब्रुवन् ॥२१॥ केचिदक्षर मेवेति
केचिदात्मेति वादिनः ॥ केचि च्चतुर्मुखस्तत्वं केचिदीश
मुमापतिं ॥२२॥ केचित्सत्वगुणोपेता स्तपसाधूनकल्मषाः
॥ परतत्वंविनिश्चिक्युः श्रीपतिःकमलेक्षणः॥२३॥ भू
योपि संवदंतस्ते संसदं ब्रह्मणोगताः ॥ गत्वातु तत्सभा
मध्ये ब्रह्माणं जगदीश्वरं।२४।नमस्कृत्वा यथान्यायं पूज
यित्वा विशेषतः ॥ न्यवेदयंश्च तत्सर्वं तत्वसंवाद मात्म
नः ॥२५॥ तच्छ्रुत्वा वचनंतेषां संवादं स्वात्मसंभवः ॥
क्षणमात्रं विचिंन्त्याथ विनिश्चित्य पितामहः ॥२६॥
विमानं किंचिदुत्पाद्य वचनं चेदमब्रवीत् ॥ भोभोऋषी
गणास्सर्वे समारुह्यो त्तमंत्विदं ॥२७॥विमानं सूर्यसंका
शं यथेष्टं गच्छताधुना ॥एतन्निपतितं भूमौ यत्रतत्र स्थ
लेस्थिताः ॥२८॥ कुरुताधोक्षजस्यांघ्रिं निधायहृदयेतपः
॥ ततस्सर्वात्मकोवायु रागत्य मुनिसत्तमाः॥२९॥ तत्वं
श्रुतिशिरोवेद्यं परमंस्मृति पूजितं ॥वेदैश्च गदितं सूक्ष्मं
वेदविद्भिश्च सात्विकैः ॥३०॥ व्यासादिभि पुराणेषु क
थितं तत्ववेदिभिः ॥ श्रीमदष्टाक्षरादीनां मन्त्राणां म
धिदैवतं ॥३१॥ उपदेक्ष्येति युष्माकं गच्छताशु महर्षयः
॥ इतिवेधो वचःश्रुत्वा तथैवेति मुनीश्वराः ॥३२॥ स
मारूढास्तु तद्दिव्यं विमानं प्रययुस्तदा ॥ गच्छतांतु
ततस्तेषां तद्विमान मनुत्तमं ॥३३॥ क्षणेनालकनन्दाया

स्ती रेपुण्ये मनोहरे ॥ न्यपत त्कुशश्चि त्तस्य भिन्नाने
मिश्च तत्क्षणात् ॥३४॥ यस्मान्नेमि र्विमानस्य शयित्वा
न्यपतद्भुवि ॥ तस्मात्त न्नैमिशंनाम तदारभ्या भवद्वनं
॥३५॥ तदाप्रभृति येपुण्ये नैमिशेते मुनीश्वराः ॥ पंच
योजन विस्तीर्णे तपःश्चक्रु श्चिरंस्थिताः॥३६॥ तप्यतांतु
तपस्तेषा माविरासी न्महात्मनां ॥ वायुस्सर्वात्मकः त
स्मि न्समये ब्रह्मवादिनां ॥३७॥ पूजितश्च यथान्यायं
तैस्समस्तैः कृतात्माभिः ॥ हरिरेव परंतत्वं नान्यो लो
केषु तत्समः ॥३८॥ इतिव्याहृत्य भगवा न्वायुरंत र्द
धेततः ॥ एतद्वायु पुराणेच तत्वमे तदुदीरितं ॥३९॥
भारताद्येषु कृत्स्नेषु पुराणेषुच भाषितं ॥ श्रुतिषु
स्मृतिषुव्यक्तं योगिना हृदये ष्वपि ॥४०॥ तस्माद्वो वि
ष्णूभक्तानां तत्वज्ञानां विशेषतः॥ परमं पावनं दिव्यं
तोदाद्रि स्थलवैभवं ॥४१॥ रहस्यमपि वक्ष्यामि श्रुयतां
सावधानतः ॥ मनुष्याणां सहस्रेषु लयःप्राताः श्रियःष
तेः ॥४२॥ सान्निधौ सर्वदावास मन्येषां मुक्तिदुर्लभं ॥
पुरामृकण्ड स्तनयो मार्कण्डेयो महातपाः॥४३॥षोडशा
ब्द मिदं प्राप्य वयोनित्यं जितेन्द्रियः ॥ नानाविधां श्च
चाराथ लोकान्सर्वत्र वैचिरं ॥४४॥ इत्येवं चरतोलो
का न्संवर्तोवै महानभूत् ॥ तदालोका नदृष्ट्वैव मार्कण्डे
यो महामुनिः ॥४५॥क्षीराब्धो सुचिरंकालं संचरन्नै र

मापतिं ॥ अद्राक्षी देकमेवाथ निदानं जगतामपि ॥४६
॥ तंदृष्ट्वा देवदेवेश नमस्कृत्वा कृतांजलिः ॥ मार्कण्डे
यो मुनिश्रेष्ठो वाचमूचे जनार्दनं ॥४७॥ भगवंस्त्वां प्र
पश्यामि नान्यंदेवं हिकंचन ॥ तस्मादेक स्त्वमेतेषां ज
गतां मीश्व रोविभुः ॥४८॥ शरणंत्वां प्रपन्नोस्मि दास
भूतोस्मि तविभो ॥ सान्निधौतव सर्वत्र स्थास्यामिति
मतिर्मम ॥४९॥ तन्मेदद्स्व भक्तस्य कृपया भक्तवत्स
ल ॥ इत्थं संप्रार्थितस्तेन मार्कण्डेयेन माधवः ॥५०॥
सन्निधा वात्मनो नित्यं स्थापयामास तंमुनिं ॥ ततस्तु
जगतां नाथो भक्तवात्सल्य वारिधिः ॥५१॥ भृगुंच त
पसां राशिं कदाचि त्कारणांन्तरे ॥स्वसमीपे स्थितं प्राप्तं
चक्रे चक्रायुधोहरिः॥५२॥रोमशस्तु मुनिश्रेष्ठो महतामपि
संमतः ॥ नित्यं त्रिषवणं स्नायी मंत्रज्ञो मन्त्र वित्तमः
५३॥पंचकाल परोनित्यं परमंतपआस्थितः॥ ध्यायंस्तुसत
तं विष्णुं स्वाध्याय व्रततत्परः॥५४॥शांतो दान्तो जितक्रो
धोजितारि र्जितकामनः ॥ एवंभूत श्चिरंलोके तत्रतत्र
स्थलेशुभे॥५५॥तीर्थेष्वपिच पुण्येषु विचरन्वै महातपाः॥
कुत्रातिष्टं स्तपस्तप्स्ये रम्योद्यानवनैर्युते॥५६॥ पुण्येपुण्य
जनावासे तीर्थेसर्वार्थ दायिनि ॥ इत्येवं चिंतयन्प्राज्ञो
रोमशाख्यो महामुनिः ॥५७॥ अथसर्वोत्तमं ज्ञात्वा तो
ताद्रिस्थलमुत्तमं ॥ पावनं सर्वजंतूनां प्रसिद्धं पुण्यवर्द्ध

नं ॥५८॥ पंकतामरसंनाम तस्मिन्तीर्थं महत्तरं ॥ ति
रे तस्य तपःकर्तुं योग्यंयोग्यैः परिवृते ॥५९॥ इतिनि
श्चित्य मनसा रोमशो मुनिसत्तमः ॥ प्रययौ तत्क्षणादे
व तोदाद्रिं सुद्रुमैर्वृतं ॥६०॥ पुन्नागै स्तिलकै र्नीपै स्त
क्कालैः पनसैरपि ॥हिंताले र्निचुले श्चूते र्दाडिमै र्बकुलै
र्धवैः ॥६१॥ आवृतं विविधै र्वृक्षै इशाखावद्भि र्मनोरमैः
॥ पुष्पितैः फलिभिःपक्कैः पादपैस्तु मधुस्रवैः ॥६२॥ ना
नाविधैः पक्षिगणै र्व्याहरद्भि र्मनोरमं ॥ मृगसंघश्च वि
विधै स्संचरद्भि रितस्ततः ॥६३॥ संपूर्णं पर्णशालाभि
रुटजैश्च मनोहरैः ॥ तटाकं निर्मलं नीलैः पंकजैः कम
लोत्करैः ॥६४॥ पुण्डरीकैश्च कुमुदै रुत्फुल्लैः परिशोभितं
॥ सेवितं देवगंधर्वैः सिद्धै रप्सरसांगणैः ॥६५॥ ऋषि
भि र्वालखिल्याद्यै र्मुनिभिश्च निसेवितं ॥ ब्रह्मविद्भिः
सदापूर्णं ब्रह्मघोषै र्विनादितं ॥६६॥ शुद्धसत्वमयं शां
तं सिद्धसंघैश्च पूजितं ॥ तत्प्रविश्य मुनिःश्रीमा न्रोम
शाख्यो महामनाः ॥६७॥ पंकतामरसे स्नात्वा भूत्वा
नियतमानसः ॥तत्तीरे कुत्रचिद्देशे शुद्धेशुद्धेन चेतसा ॥
६८॥ समाहितमनास्तस्मि श्चचारोग्रं तपश्चिरं ॥ तप्य
मानो तपोघोरं तस्मिन्विप्रो महामुनिः ॥६९॥ इन्द्रा
दि देवता स्सर्वा स्सिद्ध गंधर्व चारणाः ॥ वसवो लो
कपालाश्च रुद्रा दित्याश्च मारुतः ॥७०॥ भीतास्तस्या

श्रमेतस्मि न्रोमशस्य ययुस्तदा ॥ अब्रुवंश्च मुनिश्रेष्ठं रो
मशं तपसोर्जितं ॥७१॥ किमर्थं मुनिशार्दूल कुरुष सु
चिरंतपः ॥ मनोगतं वदस्वाद्य दास्यामस्ते वयंहितत्
॥७२॥ इत्युक्तं लोकपालैश्च श्रुत्वादेवै स्सरोमशः ॥ प्र
हस्य मुनिशार्दूलः प्रत्युवाचा र्थसंयुतं ॥७३॥ भोभोसु
रे श्वरास्सर्वे माभैष्टमत्कृतेध्रुव ॥ युष्माकं कस्यचित्स्था
नं प्रार्थितमेन चाधुना ॥७४॥ अहंहि देवदेवेशं सर्वेश्व
र मजंहरिं ॥ निष्कलं निर्मलं शांतं निर्विकारं निराश्र
यं ॥७५॥ निस्तुलं निर्गुणं नित्यं निर्विकल्पं निरंजनं ॥
सत्यसत्यात्मकं सत्यं सत्येसर्वात्मनास्थितं ॥७६॥ त्रिषु
कालेषु दृष्टुंवो निदानं जगतामपि ॥ श्रीवत्सलांछितो
रस्कं श्रीमन्तं पुष्करेक्षणं ॥७७॥ असक्तं सर्वदासक्तं
सर्वत्र पुरुषोत्तमं ॥ श्रीवैकुण्ठे स्थितोनित्यैः सेव्यते सू
रिभि र्यथा ॥७८॥ तथारूप मिहोद्यंतं तोदाद्रिं जगती
पतिं ॥ प्रेक्षितुं प्रार्थयानोहं चरामि सुचिरंतपः ॥७९॥
तदस्मा त्प्रार्थितोदेवः पुण्डरीके क्षणोविभुः ॥ जगतां र
क्षणायेह श्रीमा नाविर्भविष्याति ॥८०॥ ततोन्यत्प्रार्थनी
यंमे नास्तिलोकेषु किंचन ॥ इत्युक्त्वा समुनिश्रेष्ठो रो
मशोमुनिवित्तमः ॥८१॥ मध्येसुमनसा मासी त्तूष्णीभू
तो महातपाः ॥तच्छ्रुत्वा रोमशेनोक्तं वचनं भावुकोत्तरं
॥ ८२॥ यथागतं गतास्सर्वे देवा स्संकरष्णादयः ॥ ग

तेषु तेषु सर्वेषु देवेषु मुनिसत्तम: ॥८३॥ रोमशस्तु त-
तश्चक्रे तपउग्रं समाहितं ॥ ऋषयऊचुः ॥ सूत सर्वपुरा
णार्थ पीयूषां भोनिधसुधां: ॥८४॥ त्वतःश्रुतानि सर्वा-
णि तीर्थानांवैभवानिच ॥ किंतु पंकांबुजस्यास्य वैभवं
महदद्भुतं ॥८५॥ इत्युक्त ऋषिभिः सूतः शौनकाद्यैर्म
हातपाः ॥ श्रुत्वातस्यैव तीर्थस्य महिमान मथोक्तवान्
॥८६॥ त्रिवेण्या स्त्वधिकं लोके तत्तीर्थं चिंतितार्थदं ॥
ब्रह्मादिभिः सुरैस्सर्वै र्लोकपालैश्च पूजितं ॥८७॥ एक
वार मपिस्नात्वा तस्मिन्तीर्थे क्षितौनरः ॥ मुच्यते सर्व
पापेभ्यो मोक्षंचावाप्स्यति ध्रुवं ॥८८॥ तस्मिन् तीर्थे य
थास्नानं कुरुते मनुजस्तदा ॥ अमाया मपिकुर्वीत स्नप
नं तर्पणंतथा ॥८९॥ क्षेत्रपिंड प्रदानंच श्राद्धंचापि स
दक्षिणं ॥ महालयंच विधिव दुपवासं यथोचितं ॥९०
॥ स्वर्गपाथेय दानंच सोदकुंभं सदक्षिणं ॥ अन्नदाना
दिकं दानं पितॄणां प्रीतिकारकं ॥ ९१ ॥ लभते
सनरोनूनं गयाश्राद्धाधिकंफलं ॥ इत्थंतीर्थतर स्या
स्य पंकपंके रुहस्यवै ॥ ९२॥ संक्षेपतो मयाप्युक्तं वै
भवं भवतारकं ॥ ब्रह्माशिवश्च वृत्रारिः स्कंदः सोमो ह्य
पां पतिः ॥९३॥ ऋषयः पितरः साध्या स्सिद्धाःतस्मि
न्सरोवरे ॥ आशंसंते यतींद्राश्च कदास्नानं लभेदिति
॥ ९४ ॥ महापातक युक्तोवा पुष्कलः पतितोपिवा

॥ स्नान मात्रेण निष्पापो भविष्यति नसंशयः॥९४॥
तत्तीरवासिनः सर्वे पशुपक्षि मृगादयः॥ तत्तोय पानमा
त्रेण परंयास्यन्ति वैपदं ॥९५॥ तत्तीरे मरणं प्राप्ता ये
वाके वापि पापिनः॥ यास्यंति पूतपाप्मान स्तद्विष्णो
परमंपदं ॥९६॥ तस्मिन्सरोवरे रम्ये पंकपंका रुहाभि
धे ॥ सेवितः सिद्धगंधर्वैः पूजितश्चा खिलैस्सुरैः ॥९७
रोमशस्तु मुनिश्रेष्ठो वरोब्रह्म विदांसतां ॥ तपश्चकार
धर्मात्मा श्रीकांतस्य दिदृक्षया ॥९८॥ प्रत्यहं प्रातरुत्था
य कृत्वा पूर्वान्हिकां क्रियां ॥ श्रीमदष्टाक्षरं मन्त्रं जपं
श्च मुनिसत्तमः ॥ ९९ ॥ एवं सबहुकालान्वै तीर्थांत
त्वैक चिंतकः ॥ रोमशो मुनिशार्दूल स्तपः क्रूरं समाच
रत् ॥१००॥ग्रीष्मे पंचाग्निमध्यस्थो वर्षाकाले निराश्रयः
॥ शैशिरे समयेतिष्ठ न्कंठमग्ने जलेसदा ॥ १०१ ॥ ए
वंवर्षसहस्त्राणि त्रिंशत्तस्य महात्मनः ॥ गतानि कुर्वतः
क्रूर मन्येषां दुष्करंतपः ॥१०२॥ ततःपर महोरात्रं निरु
च्छ्वासो निराश्रयः ॥ निर्निद्रश्च निराहारो निश्चलो नि-
र्जितेन्द्रियः ॥१०३॥ पदापिन स्पृशन्भूमिं स्थाणुवत्स-
महातपाः॥परमं पुरुषं प्राप्य सर्वेषां हृदयेस्थितं॥१०४॥
चिंतय न्समहाप्राज्ञः संततंवै व्यरोचत ॥ वर्तमाने तथा
भूते रोमशाख्ये महामुनौ ॥१०५॥ दिव्यवर्ष सहस्त्राणि
व्यतीतानि ततःपरं ॥ पंकपंके रुहाख्याया वापिकाया

स्तटेशुभे ॥१०६॥ आम्रारण्ये वरेण्यानां शरण्ये पुण्य कर्मणां ॥ पुण्ये पूनेतु तोदाद्रौ रामशर्मस्य महात्मनः ॥१०७॥ पूर्वभागे शुचौ श्रीमा नाविरासी त्स्वयंहरिः॥ सहस्रमिवभानूना मुत्थितं युगपद्यथा ॥१०८॥ तेजसा स्वेनवैसर्वा दिशोविष्णु पर्दक्षिपन्ति ॥ विराजय न्समस्ता नांरक्षणार्थेशरीरिणां ॥१०९॥ तस्मि न्नवसरेदिव्यंदुंदु भीनांचानिस्वनं ॥ शंखानांच मृदंगानां संबभूवु रनेकशः ११०॥मुरवाः पणवाश्चैवमंडुकाः पूरिकास्तथा ॥ताला निचमहार्हाणिसस्वनुर्वै सहस्रधा ॥१११॥ पुष्प वृष्टिर्मह त्यासीदंतरिक्षा त्सुभा स्वरा ॥ श्रीपतिः पुण्डरीकाक्षः श्रीवत्सांकः सुरेश्वरः ॥ ११२॥ वनमाली जगद्भर्ता निदानंजगतामपिः॥शंखचक्रा युधोपेतः श्रीमन्मकरकुण्ड लः ॥११३॥ पक्षीन्द्र वाहनोविष्णु र्देवनाथो जगत्पतिः ॥आगतः स्वयमित्युच्चैःश्रीचिन्हानि समन्ततः ॥११४॥ सस्वनुस्तं समाकर्ण्य सर्वेदेवा समापतन् ॥ तोद्राद्रौतु स्वयंव्यक्तं सेवितुंवै जनार्दनं ॥११५॥ ब्रह्मारुद्रश्च देवे-न्द्रो वसवो लोकपालकाः॥अश्विनौमरुतो रुद्रा आदित्या श्च दिवौकसः ॥११६॥ गंधर्व यक्षप्रवराः सकिन्नर महो रगाः ॥ ऋषयश्च महात्मानः सिद्ध विद्याधरेश्वराः ११७ नारद स्तुम्बुरुश्चैव शनकाद्याश्च योगिनः ॥ अन्येच ब-हवश्श्रेष्टाः स्वैस्स्वैः परिजनैर्वृताः ॥११८॥ विमानानी

समारुढा श्चित्राणि मणिभिर्नवैः ॥ऋषयः सप्तसंघाश्चचार
णानां महात्मनां ॥११९॥ दिव्याश्चाप्सरसो बह्व्य स्स
र्वाभरणभूषिताः ॥ तुष्टुवु स्संगताः सर्वे देवनाथं दिवौ
कसः ॥१२०॥ गंधर्वा किन्नराश्चैव प्रजगुः सुमनोहरं ॥
ननृतुश्चाप्सरस्संघा श्चारणाश्च ववंदिरे ॥१२१॥ तदाचि
रुरुचे साक्षि स्तद्विमानै रनुत्तमैः ॥ संवृतं शतसाहस्रै रा
दित्याना मिवांबरं ॥१२२॥ रोमशोथ मुनिश्रेष्ठ श्चारि-
त्रार्थो महातपाः ॥ उन्मील्य नयनेतूर्णं ददर्शाग्रे रमाप
तिं ॥१२३॥ कोटिसूर्य प्रतीकाशं कोमलावयवोज्वलं॥
सत्यकामं समस्तेशं सच्चिदानन्द विग्रहं ॥१२४॥तप्तचा
मीकराकारे विमाने भास्करेभृशं ॥ तेजोमये स्समासीन
मेकस्मि न्नासनेविभुं ॥१२५॥ पार्श्वद्वये श्रियाभूम्या वै
नतेयेन चेन्दुना ॥ सूर्येण सैनिकेशेन मृकण्डु तनयेन-
च ॥१२६॥ चामरग्राहिणीभ्यांच भृगुणापि महात्मना॥
ज्वलंतं तेजसास्वेन श्रीपतिं पुरुषोत्तमं ॥१२७॥तोताद्रि
नायकं दृष्ट्वा स्तोतुं समुपचक्रमे ॥ ॐनमो वासुदेवाय
परमानन्द स्वरूपिणे ॥१२८॥ प्रणवार्थ स्वरूपाय परस्मै
ब्रह्मणेनमः ॥ त्रयीवेद्याय नित्याय गुणातीताय तेनमः
॥१२९॥ सर्वभूतात्मने पंच पंचमात्रस्वरूपिणे॥पंचपंचेन्द्रि
यार्थाना मधिष्ठात्रे नमोनमः ॥१३०॥ यज्ञाय यज्ञकर्त्रेच
यज्ञांगाय नमो नमः ॥ स्वाहा स्वधा वषट्कार हव्य मन्त्र

स्वरूपिणे ॥१३१॥ स्वक् स्वराज्य स्वरूपाय फलदात्रे न
मोनमः ॥ कर्तृकारण रूपाय कारणातीत मूर्तये ॥१३२
नमस्ते पद्मनाभाय पंकजाक्षाय तेनमः ॥ त्वन्मुखा द्ब्रा
ह्मणोजातः स्त्वद्बाहोः क्षत्रियास्तथा ॥ १३३॥ त्वदूर्वो
रपिवैश्याश्च पद्भ्यांशूद्रास्तु तेभवन् ॥ चन्द्रसूर्यौच ते-
नेत्रे नेतारौ सर्वतेजसां ॥१३४॥ त्वन्मुखा दग्नि रिन्द्र
श्च त्वत्प्राणा द्वायवोभवन् ॥ अन्तरिक्षंच नाभ्यास्ते द्यौ
श्चते शिरसो भवत् ॥१३५॥ त्वत्पादाभ्यां महीजाता श्रो
त्राभ्यांते दिशोदश ॥ तस्मात्त्वय्येव सर्वेश विश्वमेतद्व्य
वस्थितं ॥१३६॥ त्वमेव जगतां नाथस्त्वमेव पुरुषोत्त
मः ॥ त्वमेव देवदेवेशो देवनाथ नमोस्तुते ॥१३७॥
त्वदीया वयत्वेभ्यस्तु ब्रह्मरुद्रादयः सुराः ॥ जातास्त्वं कृ
पया ह्यस्मिन् तोदाद्रौ जगतामपि ॥१३८॥ रक्षणार्थंतु
संभूतः स्वयमेव कृपानिधे ॥ नमः परम कल्याण गुणा
नां निधयेनमः ॥१३९॥ तोदाद्रीशाय हृदये देवनाथाय
तेनमः ॥ एतेसुरगणाःसर्वे सुरज्येष्ठादयोहरे ॥१४०॥
ऋषय स्सप्तगंधर्वा महात्मानश्च योगिनः ॥ तोदाद्रिशौ
हरिस्साक्षा द्देवनाथ स्समागतः ॥१४१॥ इत्युच्चैः का
हली शब्दं श्रुत्वातूर्णं समाययुः ॥ स्तुवन्ति स्तुतिभिः
केचि त्प्रणमन्ति तथापरे ॥१४२॥ गायन्ति चान्येगंध-
र्वा नृत्यंत्यप्सरसांगणाः ॥ विमानै श्शतसाहस्रै रेषाभू-

मि नभोदिशः ॥१४३॥ सर्वत स्संवृतास्स्वामिन् श्रीपते
देवनायक ॥ पाहिमां कृपया भक्त्या त्वत्पदाब्जै कधार
कः१४४ इत्थंस्तुत्वामुनिश्रेष्ठो रोमशाख्यो महातपाः॥तो
दाद्रि नायकंदेवं देवनाथंजगत्पतिं ॥१४५॥ आनन्दा
म्भो निधौ मग्न आनन्दाश्रु परिप्लुतः ॥पुलकांकित गा
त्रस्सन् तस्थौ तूष्णीं कृतांजलिः ॥१४६॥ इतिश्री ब्र
ह्माण्ड पुराणे क्षेत्रवैभवखंडे तोदाद्रिमाहात्म्ये रोमशस्तो
त्र कथनं नाम दशमोध्यायः ॥१०॥

एकादशोध्यायप्रारंभः

श्रीमतेरामानुजायनमः

॥ श्री सूतउवाच ॥ ततोवद्धांजलिपुटं रोमशं मुनिपु
ङ्गवं ॥ संविक्ष्य कृपया विष्णु र्मंदहासोप लक्षितः ॥
१ ॥ मेघगंभीर निर्घोषः किंचिच्चलित कुंडलः ॥ उ
वाच मधुरांवाचंभगवानब्जलोचनः ॥ २ ॥ त्वयातपः
कृतंक्रूरं बहुकालं सुदुष्करं ॥ दृष्टुकामेन मामस्मिन् तो
ताद्रौमुनिसत्तम ॥ ३ ॥ त्वयाकृत मपिस्तोत्र मिदंप्रीति-
करंहिमे॥ त्वत्कृतेह मिहप्राप्तो स्तोदाद्रौ स्वयमेवहि॥४॥
श्रीवाल्लिमंका नामैषा भविष्यति पुरीशुभा ॥ क्षेत्राणा
मुत्तमंत्वेत द्रोमश क्षेत्रमित्यपि ॥ ५ ॥ पंकपंके रुहा-
ख्येस्मि न्तीर्थेस्नात्वा महामुने ॥ तीरेस्य पावने पुण्ये
प्रीतोस्मि जपतस्तदा ॥ ६ ॥ मयापि दर्शितंरूपं दुर्नि

रीक्ष्यं प्रथकूजनैः ॥ एतत्तीर्थेतु यस्स्नानं जपंच कुरते
नरः ॥ ७ ॥ तस्याहं सुप्रसन्नस्तु दास्येचार्थ मभिप्सि
तंतस्मैमोक्षंच दास्यामि प्रीतिपूर्वं नसंशयः ॥ ८ ॥
तस्मात्त्वत्प्रार्थितंदातु मागतोहं मुनीश्वर ॥ त्वयायत्प्रा
र्थितंसर्वं दास्यामितवसुव्रत ॥ ९ ॥ वृणीष्व मुनिशा
र्दूल रोमशत्वं मनीषितं ॥ एवंभगवतोवाक्यं श्रुत्वासं-
हृष्टमानसः ॥ १० ॥ रोमशस्तुतपःश्रेष्टः सर्वेषांच दि
वौकसां ॥ मध्येतोदाद्रिनाथंतं वव्रेभक्तिपुरस्सरं ॥११
॥ स्वामि न्प्रसीद भगव न्भक्ताना मभयंकर ॥ एभिः
परिजनै स्साधं सर्वेषां रक्षणायच ॥ १२ ॥ मत्कृतेपिच
तोताद्रा वस्मिन्तीर्थे महत्तरे ॥ पंकनामरसे नित्यं स-
न्निधस्वा खिलेश्वर ॥ १३ ॥ नमस्ते देवनाथायनमस्तो
दाद्रि वासिने ॥ नमस्ते पंकजाक्षाय पद्माधीशाय तेन-
मः ॥ १४ ॥ इत्थं संप्रार्थयंतंतं रोमशाख्यं तपोनिधिं ॥
उवाच कृपयावीक्ष्य सस्मितं मधुसूदनः ॥ १५ ॥ त-
थैव मुनिशार्दूल त्वत्कृतेस्मि न्स्थलेशुभे ॥ पंकतामरसे
तीर्थे तीरे नित्यंवसाम्यहं ॥ १६ ॥ ममरूप मिंदलो
के दिव्यतेजः समन्वितं ॥ द्रष्टुंनशक्यते मर्त्यै रन्यैश्चा-
पिसुपर्वभिः ॥ १७ ॥ तस्मात्सर्वेषु कालेषु पूजार्थं
सर्वदेहिनां ॥ अर्चारूपेण तिष्टामि सौम्यरूपो मुनीश्वर
॥ १८ ॥ मत्प्रभावश्च तत्वेन ज्ञातुंतदर्शितंमया ॥ अ-

त्यद्भुत मिदंरूपं दिव्यम प्राकृतं भुवि ॥ १९ ॥ अप्रा-
कृतं विमानंच देवास्तत्पालका अपि ॥ अर्चात्मना व
तोणोऽस्मि नवानुग्रह काम्यया ॥ २० ॥ एवमर्चा व
तोर्णमा मर्चयत्वं सदासुचिः ॥ लीलार्थंतु मयासृष्टा स्स
र्वेलोका मुनीश्वर ॥ २१ सुरक्षिताः क्वचित्काले संहरि
ष्यामिचक्वचित् ॥ सर्वेषामपि जंतूनां कर्मैकिं कारणं
प्रथक् ॥ २२ ॥ प्रवृतिंच निवृतिंच चेष्टितंच प्रथक् प्र-
थक् ॥ एतत्सर्वं चसंकल्पा न्माययाच कृतंमम ॥२३॥
अज्ञानिनो नजानन्ति ज्ञानीज्ञानेन पश्यति ॥सम्वादिनो
पि योगीन्द्रा नमांजानन्ति तत्वतः ॥ २४ ॥ अण्डांतर्व
र्तिनश्चेमानूरक्षितुं मेत्रयास्थितिः ॥ क्षीराब्धौ शेषपर्यंके
शायिनोमे मुनीश्वर ॥ २५ ॥ अन्तारिक्षे दिनमणिःस्व-
र्गे चेन्द्रानुजोऽस्म्यहं ॥ मायया मांनजानन्ति राजसा स्ता
मसा अपि ॥ २६ ॥ तस्मादर्चात्मना लोके कल्पे कल्पे
मुनीश्वर॥ भाविष्यामि कृतार्थास्युः पूजयित्वेति मांजनाः
॥२७ ॥ क्वचिदावि र्भविष्यामि स्वयमेव मुनिश्वरः॥ अ
वेक्ष्यामि क्वचिज्जंतु स्तिष्टा म्यचार्त्मना क्वचित् ॥२८॥
यत्रयत्र स्थले तीर्थे पुण्यक्षेत्रेच सर्वदा ॥ मूर्तयसंति
मेलोके दारु लोह शिला मयाः ॥ २९॥ तत्रसर्वत्र स-
र्वासु मूर्तिषुप्रीति संयुतः ॥ जगतां रक्षणार्थाय प्रादुर्भू
तो वसाम्यहं ॥ ३० ॥ यद्यत्समर्पितंयैस्तु तत्तत्भोक्ष्य।

स्मि भक्तितः ॥ एवंमां नविजानन्ति शिला काष्टादि
बुद्धयः॥३१॥ दूषयंनिच येमुढा स्तेयांति नरकंध्रुवं ॥ अर्च
यंतिच येभक्त्या लोकेमां भक्तिपूर्वकं ॥३२॥त्यक्तसर्वैनसो
भूता स्तेयास्यंतिचमेपदं ॥ चतुर्विधं भवत्येतत् दर्चाव
तरणंमम ॥ ३ ३ ॥ दिव्यं सैद्धं स्वयं
व्यक्तं मानुषंचेति कीर्त्यते॥त्रिविधं कृत्रिमंतेषु स्वयंव्यक्त
मकृत्रिमं ॥३४॥ अहंपंच विधोभूत्वा लोकान्रक्षामि स
र्वदा ॥ परव्यूहश्च विभव स्त्वर्चारूपों तरास्थितः॥३५॥
तेषुसर्वेषु लोकेस्मि न्नर्चामूर्तिस्तु गण्यते ॥ एकधाच
द्विधा त्रेधा पंचधेति मनीषिभिः ॥३६॥ स्वयंव्यक्त
मिदंश्रेष्ठं प्रोक्त मष्टविधं भुवि ॥ श्रीरंगं नैमिशंक्षेत्रं वें
कटाद्रिश्च पुष्करं ॥ ३७ ॥ शालग्रामंच तोदाद्रिर्नरना
रायणाश्रमं ॥ श्रीमुष्णं चेति विख्यात मेतषां नास्ति
वैभवं ॥३८॥ कांचिपुर्या मथानंत शयने वृषभाचले ॥
द्वारकेचक्रतीर्थेच श्रीनिवासेति पुष्करे ॥३९॥ नाराय
णपुरेचैव कुंभकोणे महास्थले ॥ सारक्षेत्रेतु विप्रेन्द्र मू
र्तयः संन्तिमेसदा ॥४०॥ एतानि ममदिव्यानि स्थला
न्याहु र्मनीषिणः ॥ चित्रकूटे भृगोस्तीर्थे शिखरे सत्य
नामके॥४१॥नन्दीपुर्यां व्यासतीर्थे कुंभद्वीपे स्थितोस्मी
हं ॥ एवमादि स्थलानीह सैद्धान्याहु र्मनीषिणः ॥४२
मलयन्नचमांभक्त्या प्रतिष्ठाप्य स्थलेनराः ॥ पूजयन्तिच

तत्सर्वं मानुषं परिकीर्त्यते ॥ ४३ ॥ सर्वत्रफलदाताहं रो
मशास्मिनसंशयः ॥ स्वयंव्यक्त विमानस्य चतुर्दिक्षु
द्वियोजनं ॥४४॥ क्षेत्रंतत्रस्थितोयस्तु मृतोवा जनितो
पिवा ॥ तेचसर्वे महात्मानः प्राप्स्यंतिच पराङ्गतिं ॥
४५॥ दिव्यानां योजनं क्षेत्रं सैद्धाना मर्धयोजनं ॥ मा
नुषं क्रोशदूरंस्यात् गृहेषु गृहमात्रतः ॥४६॥ शालग्राम
शिलायत्र द्वेकाद्वि वित्र एवच ॥ चतश्रोवा मुनिश्रे
ष्ठ तद्धाम परमंमम ॥४७॥ तत्स्थलंच स्वयंव्यक्तं यत्र
तिष्ठंति शाश्वत ॥ शालग्राम द्वादशच स्पर्शदोषो न
विद्यते ॥४८॥ स्वयंव्यक्तेषु सर्वेषु स्थलेष्विद मनुत्तमं
॥ तोदाद्रिस्थल मात्रेहं वसामि निरतस्सदा ॥४९॥
पंकतामरसावापी क्षीराब्धि स्यिमेवहि ॥ श्रीवैकुण्ठंतु
नगरं दिव्यतेजो मयंहितत् ॥५०॥ एषाश्री वल्लिमंका
ख्या पुरीतत्र नसंशयः ॥ इदंरूपं त्रिलोकेषु ममदिव्यं
मुनीश्वर ॥५१॥ दृष्टपूर्वं नकस्यापि त्वतःसर्वात्मनाभुवि
॥ त्वत्समोनास्ति लोकेस्मि न्तपसा भाग्य
वत्तया ॥५२॥ सकलेन स्वरूपेण दृष्टवानसिमां यत
अर्चना त्स्मरणा दृष्ट्या ममतोदाद्रिवासिनः ॥५३॥ पं
चपातक युक्तोपि मुक्तो मोक्षमवाप्स्यति ॥ पंकतामरसे
स्नात्वा तीर्थेनियत मानसाः ॥५४॥ यभजंतितु मांभ
क्त्या जपंतश्च नरोत्तमाः ॥५५॥ तेषांदत्वा बहून्कामा

नन्तेदास्यामि चामृतं ॥ एवमुक्ता मुनिश्रेष्ठंरोमशंतं त
पोनिधिं ॥५६॥ मध्येसुमनमां श्रीमा न्तोदाद्रीशोव्य
रोचत ॥तास्मिन्नवसरे सर्वे ऋषिसंघा स्समागताः ॥५७॥
वैखानसो मुनिश्रेष्ठो दधिचिश्च पतंजलिः॥ मरीचे का
श्यपो मौल्गो भृगुः कात्यायनोंगिराः ॥५८॥ जावालि
गीलवः कण्वो ह्यतिथि र्नारदो ऋषि ॥ अन्येच बह
वश्शिष्यै बहुभिब्रह्मवादिनः ॥५९॥ नारायणं नमश्च
क्रु स्तोताद्रिशं रमापतिं ॥ तुष्टुवुश्च यथान्यायं मोदमा
नाः समंततः ॥६०॥ ततस्स भगवा न्सर्वान् देवनाथ
स्समीक्ष्यच॥ वैखानस मुनिश्रेष्ठं किंचिदूचे जनार्दनः
॥६१॥ वैखानस मदंशस्त्वं पूजयित्वातू मांचिरं ॥ तव
सूत्र प्रकारेण ततस्त्वा गच्छमेपदं॥ ६२॥ इत्युक्त्वा दे
वदेवेशो देवनाथः श्रियःपतिः ॥ उवाच ब्रह्मरुद्राद्यां
स्त्रिदिवेष्णा निदंवचः ॥६३॥ ब्रम्हादयः सुरादेवाः स्था-
नं तोदाद्रि नामकं ॥ आहूय विश्वकर्माणं दिव्यंपुरमि
वापरं ॥६४ ॥ पुरींश्री वल्लिमंकाख्यां निर्मापयतु महेथ॥
चातुर्वर्णांश्च संस्थाप्य ममानित्यो त्सवादिकान्॥६५॥ आ
गमोक्त प्रकारेण माससंवत्सरोत्सवान्॥यस्मिन्कालेच वि
हिता नित्यपूजादिकोत्सवाः ॥६६॥ तत्काले कुरुतन्नृ
णां तान्सर्वान्मुनिसत्तम॥ एवंभगवतोवाक्यं श्रुत्वादेवा
स्तथेतिते ॥६७ ॥ वनंतोदाद्रिनामैत त्पुरमिन्द्रपुरश्रियं

॥ सत्वरंत्वं कुरुष्वेति विश्वकर्माण मब्रुवन् ॥६८॥ तत
स्तन्निर्जरप्रोक्तं श्रुत्वाहृष्टो महात्मनां॥ निर्ममेसपुरींश्रेष्ठां
तत्क्षणादेवतद्वनं ॥६९॥ नाम्नाश्रीवाल्लिमंकेति सर्वरत्नै
श्च पुष्कलां ॥ गोपुराणि विचित्राणि हर्म्याणि विवि
धानिच॥७०॥अष्टापदमयैस्तंभै र्विटंकैश्च विराजितान् ॥
मंडपांश्च बहूनंम्या न्सर्वरत्नाविभूषितान् ॥७१॥ स्वर्णसो
पान पंक्तींश्च स्फाटिका न्कुट्टिमानपि ॥ विद्रुमां स्तोर
णस्तंभा न्कपाटांश्च मनोरमान् ॥७२॥ वेदिकाभि र्वि
चित्राभि र्गृहाश्च ग्रहिणांवरान् ॥ विथीश्च विविधाकारा
दांतराजत वेदिकान् ॥७३॥ विचित्रा श्चन्द्रशालाश्च
वरनारीजनैर्युताः ॥ प्रपाश्चास्वाद्य पानीयाः सरसीतोय
पुष्कलाः॥७४॥ दिव्यै र्नानाविधै र्व्रक्षैः पुष्पितैश्च फलोप
गैः ॥ लक्षितानि ततस्तस्या मुद्यानानि बहून्यपि॥७५॥
एवंविनिर्मितातेन सापुरीविश्वकर्मणा ॥ श्रीवल्लिमंकाना
मेति क्षणमात्रेणसावभौ ॥७६॥ चतुर्वणाश्च तत्रास न्व
हवोनित्यवासिनः॥ धनधान्य समायुक्ता भूषणैश्च विभू
षिताः ॥७७॥ ब्राह्मणाः क्षत्रिया वैश्या श्शूद्रा स्तदनु
सारिणः ॥ स्वोस्वोचितेषु कृत्येषु सुप्रितास्ते वसन्सुखं
॥७८॥ ततस्तोताद्रिनाथस्य देवनाथस्य चस्वयं ॥ उ
त्सवांश्च विचित्रान्वै नित्यपूजां विशेषतः ॥७९॥ चक्रु
स्ते श्रद्धयोपेताः प्रत्यहं प्रीतिसंयुताः ॥ ततःप्रसन्नो भ

गवा न्देवनाथो मुदान्वितः ॥८०॥ सर्वादेवा न्समुद्दि
क्ष्य यथेष्टं गच्छताधुना ॥ सुखेन स्थीयतां तत्र व्याहृ
त्य भगवान्हरिः ॥८१॥ तस्मिन् श्रीवल्लिमंकाख्ये पत्त
ने श्रीपतिस्त्वयं॥ आविर्भूतो जगन्नाथो वसतिस्म सुरेश्व
रः ॥८२॥ वैखानसो मुनिश्रेष्ठो रोमशश्च महातपा ॥
पतंजलिश्च भगवा न्नागेश सुलिलोचनः ॥ ८३ ॥ अति
थिश्च महाप्राज्ञः शतायुः शतयागकृत् ॥ अन्येत्र मुन
योभक्ता ऋषयो ब्रह्मवादिनः ॥८४॥ पंकतामरसेतीर्थे
स्नात्वानित्यं जितेन्द्रियाः ॥ प्रत्यहं प्रातरुत्थाय नत्वा
तोदाद्रिनायकं ॥८५॥ पूजयंतश्च तंभक्त्या देवनाथस्य स
न्निधौ ॥ सुसुखंसंस्थितस्तस्मिंस्त्यक्त कार्य्यांतरोद्यमः
॥८६॥ श्रीवल्लिमंकानगरे देवनाथस्य सन्निधौ ॥ जपं
स्तोत्रं पुराणंच कीर्तनं स्थलवैभवं ॥८७॥ प्रदक्षिण न
मस्कारा न्येकुर्वंति पठंतिच ॥ तेषांक्षेत्राणि धान्यानि
गृहंवस्त्रंच भूषणं ॥८८॥ योददाति सभूलोके सुखंस्थि
त्वा ततःपरं ॥ परमंच पदंप्राप्तो भविष्यति नसंशयः
॥८९॥ तत्स्थले देवनाथस्य सन्निधौयोद्विजोत्तमः ॥ ए
वंपुराणं पठति भक्त्यायस्तु शृणोतिच ॥ ९० ॥ पुत्रका
मो लभेत्पुत्रा न्धनकामो धनंलभेत् ॥ गर्भिणी जनयेत्पु
त्रं कन्याभर्तार माप्नुयात् ॥९१॥ ऋणीऋणा द्विमुच्ये
त रोगीरोगाद्विमुच्यते॥ दरिद्रोपिच दारिद्र्या त्पापीपापा

द्विमुच्यते॥९२॥ श्रियमाप्नोति परमा श्रीकामस्तु सदा-
पठेत् ॥ क्षत्रियोजयमाप्नोति वैश्योवर्द्धीच संपदं ॥९३॥
सुद्राश्च विष्णुभक्ताःस्यु रंतेप्राप्स्यंति चामृतं ॥ यएत
त्स्थलमाहात्म्यं लिखित्वा पठितुंस्थले ॥९४॥ ददाति
विष्णुलोकेसः पुत्रपौत्रै महीयते ॥ गृहेतिष्ठति यस्येदं
स्थलमाहात्म्य मुत्तमं ॥९५॥ सपुमा न्वैष्णवेलोके नि
त्यवासं करिष्यति ॥ शौनकाद्या मुनिश्रेष्ठा युष्माभिः
पृष्टमादरात् ॥९६॥ कथितंच मयासर्वं तोदाद्रि स्थलवै
भवं ॥ युष्माकं सहवासेन संल्लापेनच सेवया॥९७॥कृ
तार्थोस्मि मुनिश्रेष्ठा भवतोदर्शनेनच ॥ अत्यद्भुत मिदं
शुद्धं तोदाद्रिस्थल वैभवं ॥९८॥ शृण्वतः पठतोवापि
तस्यसर्वेपि विश्यति ॥ भूत प्रेत पिशाचाद्यै र्ग्रस्ताये
कल्मषैरपि ॥९९॥ एतत्श्रवण मात्रेण मुक्ताःस्यु स्ते-
नसंशयः ॥ राजद्वारे विवादेवा स्मशाने शत्रुसंकटे॥१००॥
भूतसंघे वनेचैव दावाग्नौ जलमध्यतः ॥ सिंह्मव्याघ्र ग
जादिभ्यो भयकाल उपस्थिते ॥१०१॥ तदापठनमात्र
ण मुच्यते सर्वभीतिभिः ॥ एवंसूतेन कथितं श्रुत्वा तो
दाद्रिवैभवं ॥१०२॥ कृतार्थास्म इतिप्रोक्ता नैमिशार
ण्यवासिनः ॥ बहूमन्यन्ततंसूतं शौनकाद्या ऋषीश्वराः
॥१०३॥ इतिश्री ब्रह्मांडपुराणे क्षेत्रवैभव खंडे तोदाद्रि
महात्म्ये क्षेत्रनिर्माण मर्चासुयोजनकथंननाम एकादशो
ध्यायः समाप्तम् ॥

द्वादशोध्यायप्रारंभः

श्रीमतेरामानुजायनमः इत्थं तोदाद्रि महात्म्यं तस्मैकथयतेददुः ॥ सूताय सर्वशास्त्रार्थ तत्वज्ञान ऋषीश्वराः ॥ १ ॥ केचित्कमण्डलु केचिद्दण्ड मन्येतु वल्कलं ॥ ददुः केचित्फला न्यस्मै मूलानि विविधानि च ॥ २ ॥ तुलसीपत्रमात्रंतु ददुः केचि न्मुदान्विताः ॥ श्रुत्वातोदाद्रि माहात्म्यं सूतंतं रोमहर्षणं ॥ ३ ॥ स्तुत्वानमस्क्रियां कृत्वा भक्तिज्ञान समन्विताः॥ शौनकाद्या मुनीद्रास्ते पुनः पप्रच्छुरादरात् ॥ ४ ॥ सूतसर्व सारज्ञ देवानां कस्यवामुने ॥ भूलोके वान्तरिक्षेवा ब्रह्मशापो विमोचितः ॥ ५ ॥ पापंच मोचितं कस्य केवाप्राप्ता पराङ्गतिं ॥ पंकतामरसे स्नात्वा द्रष्ट्वा तोताद्रिनायकं ॥ ६ ॥ इत्थंसंप्रार्थितः सूत स्तानुवाच मुनीश्वरान् ॥ शौनकादि मुनिश्रेष्ठा रहस्यं श्रूयतामिदं ॥ ७ ॥ पुराकल्पांत कालेतु ब्रह्मालोक पितामह ॥ पंकतामरसेस्नात्वा देवनाथं समर्चयन्॥८॥किंचित्कालं स्थितस्तस्मिं स्तोदाद्रौच तपश्चरन् ॥ लब्धात स्सृष्टिसामर्थ्यं देवनाथ प्रसादतः ॥ ९ ॥ सत्यलोके स्थितःपश्चा ल्लोकसृष्टिं चकारह ॥ सूर्यश्चन्द्रो ङ्गारकश्च बुधोदेव गुरू-

भृगुः ॥ १० ॥ शनीश्वरश्च राहुश्च केतुरेते नवग्रहाः॥ कृपया देवनाथस्य कदाचि त्कारणान्तरे ॥ ११ ॥ चर न्ति लोकरक्षार्थं भूत्वाते ग्रहनायकाः ॥ सप्तर्षयोपि तपसा तोषयित्वा भृशंहरिं ॥ १२ ॥ पंकतामरसे स्ना ना त्भूत्वानिर्धूत कल्मषाः ॥ नक्षत्रपदवींप्राप्य वर्ततेरुंध तीयुताः ॥१३॥ देवेन्द्रोपि महातेजा वृत्रासुरवधेकृते ॥ ब्रह्महत्या मथप्राप्तो भूलोकेसंचचारह ॥ १४ ॥ तदापं- कांबुजेतीर्थे स्नात्वापि त्यक्तकल्मषः॥ तोदाद्रीशंचदेवेशं पूजयित्वा यथाविधि ॥ १५ ॥ प्रदक्षिण नमस्कारै स्तोषयित्वा ततःपरं ॥तत्प्रसादा दगात्स्वर्गं देवैस्सम मितिश्रुतं ॥ १६ ॥ त्रैलोक्यं पालयामास सेव्यमान स्सुरैश्चिरं ॥ व्यासःपराशरो भीष्मो नारदश्शौनकः शु कः ॥ १७ ॥ अम्बरीषश्च विख्यातः सर्वेभागवताअपि ॥ तोदाद्रिवासं संप्राप्ताः पंकतामर सेचिरं ॥ १८ ॥ स्नात्वा तोदाद्रिनाथंतं पूजयित्वा विशेषतः ॥ तत्प्रसा दाच्च तेसर्वे महत्वं संप्रपेदिरे ॥ १९॥ अन्येपि बहवोदे वा ऋषयश्च महीभृतः ॥ तोदाद्रौवसतिं प्राप्य प्रापुश्च परमाकृतिं ॥ २० ॥ श्रीवाह्लिमंका नगरे दिव्य पुण्यत मेशुभे॥ योजनद्वय विस्तीर्णे वसंतोऽपि मृगादयः ॥२१॥ तेसर्वे सूरिभिस्तुल्या जीवन्मुक्ता नसंशयः॥अहोतोदाद्रि महात्म्यं महदाश्चर्य कारणं ॥ २२ ॥ सर्वपाप प्रशमनं

सर्वाभिष्ट प्रदायकं ॥ स्मरणादपि सर्वेषां दूरितक्षय का
रकं ॥२३ ॥ येपठंति सतांमध्ये सन्निधौयोश्रियःपतेः ॥
तेषां हस्तगतंमन्ये पुरुपार्थ चतुष्टयं ॥ २४ ॥ इदंपुरात
नं त्वार्षं वेदैश्च समतांगतं ॥ यःपठेत्सर्वपापेभ्यो मुक्तो
भवति मानवः ॥ २५ ॥ यइदंश्रावयेद्विद्वान्मातरं
पितरं गुरुं ॥ सर्वपापात्प्रमुच्येत विष्णुलोकं सगच्छति
॥ २६ ॥ ब्राह्मणा क्षत्रिया वैश्याः शूद्राश्चैव स्त्रियोत्त-
माः॥श्रृण्वन्तु सततंभक्त्या पुजयेयुश्च तंद्विजं ॥२७ ॥
वस्त्राणिच महार्हाणि क्षेत्राणिच ग्रहाणिच ॥ बहुनि
धनधान्यानि भूषणानि वराण्यपि ॥ २८ ॥ तस्मैदत्वा
द्विजेन्द्राय पठतेस त्कथामिमां ॥ पूजयेयु श्चतंसर्वे गंध-
पुष्पा क्षतादिभिः ॥ २९ ॥ येतुश्रृण्वन्ति तोदाद्रि स्थ-
लमाहात्म्य मुत्तमं ॥ सर्वपापहरंनृणां मुक्तिमार्ग प्रदी-
पकं ॥ ३० ॥ तेषु श्रीवल्लिमंकेशः सुप्रसन्नो भविष्यति
॥ एवमेतत्पुरावृत्त माख्यातं भद्रमस्तुवः ॥ ३१ ॥ प्र-
व्याहरत विस्रब्धं बलंविष्णोः प्रवर्धतां ॥ इतिश्रीब्रह्मा
ण्डपुराणे क्षेत्रवैभवखण्डे उमामहेश्वरसंवादे तोदाद्रिमा
हात्म्ये ब्रह्महत्याविमोचनंनाम द्वादशोध्यायः ॥ ३२ ॥
ब्रह्माण्डपुराणान्तर्गत श्रीतोताद्रिमहात्म्यम्समाप्तम् ॥

त्रियोदशाध्यायप्रारंभः

॥ श्रीमतेरामानुजायनमः ॥

॥ श्रीः ॥ स्कंदपुराणे तीर्थमाहात्म्यं ॥श्रीहर उवाचः ॥
शृणुभद्रे महाश्चर्यं कथां कथयतोमम ॥ यःशृणोति कथांलोके सर्वपापैः प्रमुच्यते ॥१॥ तोदाद्रिनाथ कथना त्स्नाना त्पंकेरुहे प्रिये ॥ पुराकश्चि त्वैश्यपति स्तस्यक्षे त्रस्य वैभवात् ॥२॥ स्नानात्पाना द्दर्शनाच्च विष्णोश्चैव विशेषतः ॥ पिडितो व्याधिभिर्वैश्य उग्रैः कुष्ठादिभिर्भृशं ॥३॥ स्तुत्वा स्तुत्वा जगन्नाथं लेपयित्वा स्वकंवपुः॥ तीर्थोदकैः प्रतिदिनं तैलपूतैरमण्डयत् ॥४॥ पीत्वातीर्थ उषःकाले मध्यान्हे सायमेवहि ॥ हविष्याशी जितक्रोधो नित्यदान परायणः ॥५॥ ऋषेभार्गव वाक्येन व्याधिंत्यक्त्वा वणिक्पतिः ॥ पूर्वव त्स्वपुरं प्राप्य वणिक्कर्मपय वंचकः ॥६॥ आर्जयित्वा बहुधनं पुत्रपौत्रादि संयुतः॥ लोकेबहुविधा न्भोगा न्भुक्त्वान्ते मोक्षमश्नुते।७॥ इतिभर्तुः कथांश्रुत्वा गौरीप्रत्याह कौतुकात् ॥ गौरीउवाचः ॥ कथांकथय विस्तार्य तस्यवैश्यस्य मेप्रिय ॥८॥ इतितस्या वचःश्रुत्वा पुनराहमहेश्वरः ॥ पुराकश्चित् वणिक्श्रेष्ठः कावेर्या उत्तरेतटे ॥९॥ रुद्रस्थले महापुण्ये नाम्नाश्रीमूलसंज्ञिके ॥ तस्मिन्तिष्ठति वैश्यानां पतिर्नाम्ना विभीतकः ॥१०॥ सर्वसंप त्समायुक्तः समबुद्धि र्वि

शेषतः ॥ विष्णौ हरेच विप्रेषु पूजांकुर्वन्हि भक्तितः ॥११॥ एवंतिष्ठति वैश्येन्द्रे तस्मिन्पुरवरोत्तमे ॥ तस्यपुत्रो महानासी न्नाम्नावैधर्म वत्सवलः ॥१२॥ पुत्रस्य मुध्निनिक्षिप्य संसारस्य धुरंमहत् ॥ तीर्थयात्रां प्रकुर्वाण प्राप्तवान्वैष्णवंपदं ॥१३॥ धर्मवत्सल नामातु पित्रादत्तं महद्धनं ॥ गृहीत्वाविविधा न्भोगा न्भुक्त्वातिष्ठति तत्रवै ॥ १४ ॥ पितेवधर्मा न्कृत्वातु वणिक्कर्म चकारसः ॥ कर्मणातेन वैश्यस्तु आर्जयामास वैधनं ॥ १५ ॥ कोटिनिस्क मुपायेन वणिक्कर्मण्य वंचकः॥एतस्मिन्नेव काले तु तस्यवैश्य पतेःप्रिये ॥ १६ ॥ दुर्बुद्धि रभवक्रूरा विष्णो र्दूषण संभवा ॥ कापालिकेन केनापि संगम्य विधिचोदनात् ॥ १७ ॥ धनंसर्वं ह्यपात्रेषु दत्वा प्रति दिनंबहु ॥ पितृद्रोहं महत्कृत्वा मातृद्रोहं तथैवच ॥ १८ ॥ देवब्राह्मण द्रोहंच सचक्रे बुद्धिपूर्वकं ॥ धनंसर्वं विहायाशु बंधुभिश्च समुज्झितः ॥ १९ ॥ देशाद्देशं परिभ्राम्य चौर्य्यंकृत्वातु वैपुनः ॥ चचार विविधा न्देशा नेकाकी धर्मवत्सलः ॥ २० ॥ उपायेन बहुद्रव्या ण्यार्जयामीति निश्चितः ॥ व्यापारा न्विविधा न्कर्तुं मनश्चक्रे वणिक्श्वरः ॥ २१॥ व्यापारार्थं ममद्रव्यं नाकिंचि दिहविद्यते ॥ कपटेनच व्यापारः कर्तव्य इतिनिश्चितः ॥ २२ ॥ यत्रव्यापार कर्तार स्तत्रगत्वा वणिक्प

तिः ॥ चकार तत्तद्व्यापारं वैश्यैस्साक मशंकितः ॥
२३॥ तैश्चसर्वैर्व हुमतो विश्वास न्विविधानसौ ॥ चका
रतेषां तेसर्वेचक्रुर्विश्वास मेवहि ॥२४॥ कुलंगोत्रं स्थलं
चैव पितरं मातरंतथा ॥ उवाचतेषां विश्वासा च्छुत्वाते
परयामुदा ॥२५॥ वहुमानंच कृत्वास्य व्यापारार्थं धनं-
ददुः ॥ गृहीत्वातु धनंतेभ्यो व्यापारंच चकारह ॥२६॥
एतस्मि न्नेककालेतु दुर्बुद्धिरभव त्क्षणात् ॥ वंचयित्वा वै
श्यवरा नादायवहुलं धनं ॥२७॥ देशांतर मनुप्राप्तो यत्र
व्यापारकास्थिताः॥सतत्रगत्वा चिरंकाल मवसद्भय वर्जि
तः ॥२८॥ एतस्मिन्नेव कालेतु व्यापारार्थं वणीकृश्वराः
गृहीत्वा विविधा न्द्रव्या न्व्यापारार्थं समुत्सुकाः ॥२९॥
निर्ययु र्नगरात्तस्मा त्तेसर्वे वैश्यसत्तमाः ॥ समयंचैव
विज्ञाय वंचनार्थं मनोदधे ॥ ३० ॥ निश्चि त्यममसा
सोपि तैःसार्धं निर्ययौप्रिये ॥ गृहीत्वा ऋषभांकाश्चि त्स्व
ल्पमूल्येन वैपुनः॥३१॥उपायेनतु तान्सर्वा न्पूरयामीति
निश्चितः॥कोणिका न्पुरयामीति निश्चित्य मनसासदा
॥३२॥ कपटेनच कृत्वातु कोणिका न्पूरितान्बहून्॥लो
ष्टाभ्यां शर्कराभ्यांवै सूरणाभ्यांच पूरितान् ॥३३॥ ता
न्कृत्वा ऋषभारुढा न्वंचनार्थं ययौमुदा ॥ दुरा द्दुरतरंग
त्वा देशाद्देशं चचारसः३४।एवंचरति तस्मिन्वै वहुकालं
विधेर्वशात् ॥ वैश्यास्तु वहवोमूढा स्वान्स्वान्द्रव्या न-

नेकशः ॥३५॥ व्यापारार्थं ययुर्देशं यत्रव्यापारकात्वहु ॥
तत्रगन्तु मनास्सर्वे अर्धरात्रे विनिर्ययुः ॥३६॥ एतस्मि
न्समये सोपि तैःसार्धं निर्ययौमुदा ॥ संभाष्यतैर्बहुमत
स्तैस्सार्धं संचचारह ॥३७॥ तेतुवैश्याश्च तेनापि गत्वादू
रंवुभुक्षिताः ॥ कुत्रचित्स्थलमुद्दिश्य अवरोप्य धनान्स्व
कान् ॥३८॥ स्वयंपाकवशात्तपि तंविना कुत्रचित्स्थले॥
एतस्मिन्नेव कालेतु तंदृष्ट्वा समयंवणिक् ॥३९॥ स्वकी-
या न्तत्र निक्षिप्य ह्यन्यानादाय सत्वरं ॥ ययौचातिर्यग्मा
र्गेण मोहयित्वाच तानपि ॥४०॥ विक्रीत्वा तानि सर्वा
णि अर्धमूल्य युतानिवै ॥ क्रीत्वातान्यविशेषेण तेभ्यो
नपरिशंकितः ॥४१॥ गृहीत्वा तानिमनुजा वहुमूल्य यु
तानिवै ॥ गृहीत्वास्वल्प मूल्येन ययुस्तस्यग्रहंप्रति॥४२॥
धर्मवत्सलनामातु दूराद्दूरतरंगतः ॥ गणयामासतान्द्रव्या
नेकान्ते कुत्रचित्स्थले ॥४३॥ निक्षिप्यतानि द्रव्याणि
गृहीत्वा स्वल्पमेवहि ॥ संचचार भयाद्भीत स्तैरलक्ष्यै
स्सपापकृत् ॥४४॥ अथविश्वास्य तंवैश्याः क्षुत्पिपासा
र्दितावहु ॥ दृष्ट्वादूरेजलंचैव कूलेमहतिसंभवाः ॥४५॥
इतिनिश्चित्य तेवैश्या स्तत्रनिक्षिप्यतांप्रिये ॥ यत्रदूरेजलं
दृष्टं तत्रतेजग्मुरंजसा॥४६॥स्नात्वापित्वा जलंसर्वेस्वयंपाकं
चचक्रिरे ॥स्वयंपाकंच कृत्वाथ भुक्त्वाचैव यथेष्टतः॥४७॥
श्रान्तेन मनसा युक्ता स्तत्रतेसस्वपुर्वने ॥ अर्धरात्रे

समुत्थाय यत्रातिष्ठति तत्रवै ॥ ४८ ॥ गत्वाद्दृष्ट्वाच तंवै
श्यं धनंचैवचसर्वशः ॥ दुःखेनमहताविष्टाः शुशुचु स्त
त्कारणात् ॥४९॥ देशान्नानाविधा न्वीक्ष्य तंचवैश्य
पतेस्सुतं ॥ अदृष्ट्वा दुःखसंपन्ना विचिन्वंतो दिदृक्षया
॥५०॥ गूढेनकुत्रचित्स्थाने वसंतंवीक्ष्य दुःखितं ॥ वध्वा
पाशेन महता स्वदेशंप्रापदिरे ॥५१॥ निगलेनच सं
योज्य बाधांचक्रुर्दिनेदिने ॥ एवंतैस्ताड्यमानोपि ऊचे
किंचिन्नतान्प्रति ॥५२॥ शेषधनंच दत्वातु निक्षिप्तंच
धनंचवै ॥ कारागृहे चिरंकाल मवसन्निर्गलेनसः ॥५३॥
तस्यमाता प्रार्थ्यमाना वंधुभिश्चवणीश्वराः ॥ मुमुचुर्नि
गलं छित्वा याहियाहीतिचाब्रुवन् ॥५४॥ एवमुक्तस्तु
तैस्सर्वै र्वनंघोरमुपाययौ ॥ वनेवहुमृगान्हत्वा क्षुत्पिपा
सा समाकुलः ॥५५॥ सिंहेन महताक्रांतः पंचत्वं प्र
तिपेदिवान् ॥ नरकेयातनान्भुक्त्वा पिशाचीं योनिमाप्त
वान् ॥५६॥ पिशाचो विचर न्कालं सहस्र दशकंभुवि
॥ स्थावरादीनि जन्मानि जंगमाजंगमानिच ॥५७॥
क्रिमिकीटादि संप्राप्य चांडालींयोनि माप्तवान् ॥ बहु
दुःख मनुप्राप्य पश्चाच्छूद्रो भवत्तदा ॥५८॥ शूद्रजन्म
मनुप्राप्य व्यापारेण सजीवति॥ वैश्यस्त्रींच विवाह्यासौ
तयारेमे चिरंप्रिये॥५९॥पूर्वजन्मविपाकेन व्याधिस्तस्या
भवत्क्षणात्॥ कुष्ठाद्यपस्मरादीनि वहुनि विविधानिच

॥६०॥ तैश्चैवं बहुभिक्लिष्टो व्याधिभिः परमार्दितः ॥ कृमिभि र्दश्यमानस्तु क्षुधाचपरिकंपितः ॥६१॥ आधिना व्याधिना व्याप्तः शुशोच परमातुरः । एवंसंसोचमानस्य कंश्चिद्दिजं शरणंलभे ॥६२॥ दैवयोगेन तस्यैवं ज्ञानंसमभवत्तदा ॥ सत्संगादिह मुच्येते व्याधिनापि प्रपीडितः ॥६३॥ इतिनिश्चित्य मनसा भार्गवं शरणंययौ ॥ नत्वास्तुत्वा द्विजश्रेष्ठ मुवाचविनयान्वितः ॥६४॥ भगवन्मां कृपादृष्ट्या पापपूरित विग्रहं ॥ व्याधिभिः कुष्ठविंकुष्ठाऽपस्माराभिश्चमार्दितः ॥६५॥ रक्षरक्षेतिकृपया याचतेबहुधागिरा ॥ तस्यतद्वचनंश्रुत्वा भार्गवो वाक्यमब्रवीत् ॥६६॥ सर्वंपूर्वंकृतंपापं त्वयावाणिजकर्मणा ॥ वंचयित्वा धनानित्वं वणिजान्सु बहून्यपि ॥६७॥ चौर्येणसुचिरंकालं लोकेचरासि पापकृत् ॥ कार्पासकोणिकानांच कुथालेभ वतासदा ॥६८॥ हृतानितेनदोषेण कुष्ठव्याध्यादि संयुतः ॥ बहुक्लेशयुत स्त्वंहि चिरंचरासि भूतले ॥६९॥ यत्तत्प्राप्तं त्वयापूर्वं नरकप्राप्तिमेवच ॥ स्थावरादिषु जन्मंच पशुपक्षिमृगादिषु ॥७०॥ अधुना कुष्ठवेषण व्याधिना परिपीडनं ॥ सर्वंविज्ञात मवैव दिव्यदृष्ट्या वणीश्वर ॥७१॥ ममाश्रमपदं प्राप्य सुखमेष्यति मानवः ॥ तस्मात्वां रक्षयाम्यद्य मुंचदुःखं सुदारुणं ॥७२॥ तस्यतद्वचनं श्रुत्वा सपापिव्याधिनातुरः ॥

हर्षेणमहताविष्ट स्तुष्णीमास्ते द्विजाग्रतः ॥७३॥ भार्ग
वस्तु विचार्याथ तस्यमोक्षस्य कारणं ॥ लोके-
प्रसिद्धं यत्तीर्थं तत्तीर्थेह्यस्यमोचनं ॥७४॥ इतिनिश्चित्य
मनसि तमुवाच कृपानिधि ॥ हेवैश्यवर लोकेषु प्रसिद्धं
यत्स्थलंशुभं ॥७५॥ तत्स्थले व्याधिना मुक्तः पूर्ववत्त्वं
भविष्यसि ॥ तोदाद्रिरिति विख्यातं दक्षिणादिशि सं-
स्थितं ॥७६॥ पंकपंकेरुहन्नाम तीर्थमस्तिशुभोदकं ॥ ह
रिःसंनिहतस्तत्र लक्ष्मीभूम्यानिसेवितः ॥७७॥ मार्क
ण्डेयेन मुनिना भृगुणापरिसेवितः॥ चामरग्राहिणीभ्यांच
पार्श्वयोरुभयोरपि ॥७८॥ सेवितःपुष्पवद्भ्यांतु धरित्र्या-
चैकपार्श्वतः ॥ लक्ष्म्याचैव परेभागे एकसिंहासने स्थि
तः ॥७९॥ प्रत्यक्षंकुरुतेनित्यं भक्तानांहितकाम्यया ॥
तत्रगत्वा कुरुस्नानं त्रिकालंविधिपूर्वकं ॥८०॥ सेवित्वा
देवदेवंच पीत्वातीर्थोदकं शुभं ॥ विष्णुभक्तान्नमस्कृ-
त्य मण्डलावधितत्रैव ॥८१॥ एवंदिने दिनेकृत्वा विपा
पोभवसिध्रुवं ॥ तस्यैववचनंश्रुत्वा नमस्कृत्वाद्विजोत्तमं
॥८२॥अनुज्ञाप्यचतंभक्त्या भार्यासाकं वणीकूश्वरः॥त
त्रगत्वा महातीर्थे पंकतामरसेशुभे ॥८३॥ कृत्वात्रिषव
णंस्नानं नत्वादेवं जनार्दनं ॥ पूजयित्वा यथान्यायं षो
डशैरुपचारकैः ॥८४॥ नैवेद्यान्बहुधा कृत्वा अपूपादि
रसान्वितान्॥निरांजनंच ताम्बुलं दत्वातस्मै वणीकूश्व
रः ॥८५ ॥ अभिषेकोदकेनैव तैलपूतेनवासकृत् ॥ पी

त्वाविःक्षिप्य देहेच मण्डलावधि सन्निधौ ॥८६॥ उषि त्वाच निराहारो निर्निद्रसर्वकामदं ॥ देवनाथं विशेषेण अभिषिच्य नवैःश्रितैः ॥८७॥ तैलैःप्रतिदिनंविष्णु देव नाथ मपूजयत् ॥ ब्राह्मणान्भोजयित्वातु तत्स्थले निव सन्वहून् ॥८८॥ ताम्बुलं चंदनंदिव्यं दक्षिणाभि स्सम न्वितं ॥ दत्वातेभ्यो नमस्कृत्य आसीर्भि रभिवर्धितः ॥८९॥ तेषामनुमतेनैव भुक्त्वाचेष्टंनिवेदनं ॥ वैष्णवैश्च समायुक्तो हरिलांछन लांछितः ॥९०॥श्वेतमृत्तिकयाफा ले भुजधारिततोरिणा ॥ तुलसीवनमालाभिः पवित्रमा लयांकितः ॥९१॥ मुंडीकाषायवसनो विष्णुशुश्रूषयायु तः ॥ देवनाथस्य भृत्यस्सन्चिरं वसातितत्पुरे ॥९२॥त्रि वर्ष मवसत्तत्र भार्ययासहितस्तुवै ॥ एवंवसति वैश्येन्द्र देवनाथः कृपानिधिः ॥९३॥कृपांकर्तुं मनश्चक्रे भक्तव श्योहरिःसदा ॥ स्वप्नंचदर्शयामास विपापोसिदृढवृतात् ॥९४॥ स्नानात्पाना द्दर्शनाच्च पूजयावैश्यसत्तम ॥ अ र्चनादभिषेकाच्च कुष्टादिभ्यो विमुच्यसे ॥९५॥पूर्ववत्प्रा प्यसेदेहं व्याधिनामोचितंदृढं ॥ अत्रैवचचिरंकालं मद्द र्शनपरायणः ॥९६॥अन्तेचमत्पदंप्राप्य मल्लोकेवससत्तम ॥ एवंदृष्ट्वावैश्यवरो निद्रामुत्सृज्यदूरतः ॥९७॥ किमेत दितिचिंत्यासौ भार्यायाःप्रोक्तवानमुं ॥ देवनाथस्यवाकु र्यां द्देववाक्यं नसंशयः ॥९८॥ एवजन्योन्यसंभाष्य सु

खंतावृषतुर्मुदा ॥ एतस्मिन्नेवकालेतु व्याधिभि र्मोचि
तो वणिक् ॥९९॥पूर्ववच्च वपुःप्राप्य दिव्यदेहो भवत्क्ष
णात्॥आधिभि र्व्याधिभि र्मुक्तोदेवनाथस्य सेवया॥१००
श्चिरंकालं वसंस्तत्र देवनाथस्य दासकः ॥ कुर्वन्बहुविधा
न्कृत्या न्परिचारादिकानसौ॥१०१॥ एवंबहुचिरकालं व
सत्यस्मिन्वणीकृश्वरे ॥ वार्धक्यमभवत्तस्य धर्मनिष्ठापर
स्यच ॥ १०२ ॥ पुत्रेषुभारंनिक्षिप्य विष्णोपदम
वाप्तवान् ॥ श्रद्धधानस्तु योमर्त्य स्तस्मिंस्तीर्थे
निमज्यच ॥ १०३ ॥ नमस्कृत्वा देवदेवं पीत्वातैलोद
कंशुभं ॥ प्रदक्षिण नमस्कार परिचर्या विशेषतः १०४
मुच्यतेसर्वपापेभ्यो व्याधिभि श्चापीडीतः ॥ दारिद्र्येणै
वचाक्रान्तो यथावैश्यवरःप्रिये ॥१०५॥ तथैवतैर्विनिर्मु
क्तो विष्णोस्सायुज्यमाप्नुयात् ॥ यइदंशृणुयान्नित्यं पठते
वानरस्तथा ॥१०६॥ सर्वपापै प्रमुच्येत विष्णोस्सायुज्य
माप्नुयात् ॥ यइद मिहभवान्यै व्याहृतंधर्मयुक्तं व्रजिन
विलयहेतुं भूतनाथेननृणां॥ बहुविध मपिविष्णो देवनाथ
स्य लीलां लिखतिपठतियोवा प्राप्नुया त्सर्वकामान्१०७
इतिस्कांदे पुराणे तीर्थवैभवखंडे तोताद्रिमहिमानाम ए
कोनशीतितमस्सर्गः समाप्त ॥ अत्रत्रयोदशशः ॥

चतुर्दशोध्याय प्रारंभ

श्रीमतेरामानुजायनमः

।। हरउवाचः ॥ पुराकश्चि द्विजोविद्वा न्नाम्नावैद्य
नाथकः ॥ रुद्राक्षमालाभरण स्त्रिपुण्ड्रां कितमस्तक:
॥१॥ भस्मोद्धलित सर्वाङ्गो वेदवेदांगपारगः ॥ नित्यंस्ना
नपरोदान्तः सर्वभूतेषु संमतः॥२॥ वेगवत्यास्तटेरम्ये भा:
र्यया सहविश्रुतं ॥ अवसत्तत्र कुर्वाणः शिवपूजां सुनि-
श्चलः ॥३॥ औपासनादि कर्माणि शिवभक्ति समन्वि-
तः ॥ कुर्वन्सर्वाणि तत्रैव वासंचक्रे द्विजोत्तमः ॥४॥ स
वैर्गुणैश्च संपनः सर्वभूतष्वहिंसकः ॥इत्थंवसति विप्रेन्द्रे
तस्यपुत्रोभवत्सुधीः॥५॥ ततःपितृऋणान्मुक्तो तातकर्मा
करोत्क्रमात्॥उद्युक्तस्सहिविप्रेन्द्रो नामकर्तुं शिशोस्तदा
॥६॥ रात्रौस्वप्नंच दृष्ट्वासौ दुःखेनमहतावृतः ॥ स्वभा
र्यायां निवेद्याथ तथाबंधुभिरेवच ॥ ७॥ ऊचेस्वप्नंच ते
भ्योपि वैद्यनाथो द्विजोत्तमः ॥ द्विजउवाचः ॥ अहंचदृ
ष्टवानस्मि स्वप्नंदुःखकरंपरं॥८॥ शृणुध्वं बांधावायूयं विस्त
रेण वदाम्यहं ॥ शंकरः प्रिययासार्धं ऋषभेन्द्रं समास्थि
तः ॥९॥ स्वपंतंमांच बोध्यासौ उवाचपरयागिरा ॥ सु
तस्यतवविप्रेन्द्र ममनामांकनंद्विज ॥ १०॥ विसृज्यनाम
कर्णंच विष्णुनामांकितंकुरु॥ इतिप्रोवाचमां प्रीत्या म
हादेवो महामनाः ॥११॥ यूयंयथोचितंकर्म ब्रूथशुद्धेन

चेतसा ॥ तस्यतद्वचनंश्रुत्वा प्रत्यूचु र्बांधवाश्चतं ॥१२॥
शृणुत्वं कारणंविप्र यद्ब्रूयाच्चमहेश्वरः ॥ तत्कुरुत्वं
महादेव भक्तोनान्य धियाधुना ॥ १३ ॥ तेष
तुवचनंश्रुत्वा प्रत्युवाचकृतांजलिः ॥ ममवंशे पुरा
कोवा नामकर्मविशेषतः ॥१४॥ कृतवान्शिव भक्तस्स
न् तस्मान्ममनरोचते ॥ इतिनिश्चित्य मनसा शिवना
मान्वितंशिशोः ॥१५॥चकारनामकरणं महादेवइतिश्रुतं
॥ कृत्वासंतोषयुक्तोसौ सुखेनोवास वैचिरं ॥१६॥ अन्न
प्रासन्नमेवाथ उपनिषत्कामणंतथा ॥ चौलंकृत्वातु वि
धिवत् पोषयामास तंशिशुं॥१७॥ पंचमेब्देपितातस्य च
कारोपनयंमुदा ॥ ब्रह्मचर्येण संयुक्तो भिक्षाशीविजितेन्द्रि
यः ।१८॥ शुद्धयज्ञो पवीतश्च शुद्धकौपीनवान्सदा ॥
मौंजीकृष्णा जिनधरो लवणक्षार वर्जितः ॥१९॥ ब्रह्म
चर्याश्रमस्यैता न्यनर्हाणि सबालकः॥ त्यक्त्वातानि वि
शेषेण वसन्गुरु कुलेसदा ॥२०॥ वेदानध्यापयामास वे
दाङ्गानिचसर्वशः काव्य नाटक शास्त्रादी न्यधीत्य विवि
धान्यपि ॥२१॥ गुरोश्च दक्षिणांदत्वा अनुज्ञाप्य गुरुंत
दा ॥ कर्तुंविवाह मुद्युक्तः पित्रोरंतिक माविशत् ॥२२॥
तंदृष्ट्वा विद्यया पूर्ण माचारेणसमन्वितं ॥ पितासंतोष
युक्तस्स न्परिष्वज्ये दमब्रवीत् ॥२३॥ त्वांदृष्ट्वा पुत्रतुष्टो
स्मि वेदवेदाङ्गपारगं ॥ कर्तुंविवाहसमय इतिपुत्रमभा

यत॥२४॥इत्युक्त्वाच पितातस्य विवाहार्थेमनोदधे॥वसि
ष्ठगोत्रे उत्पन्नां कन्यांकमललोचनां॥२५॥मुद्गलस्यसुतामे
च्छद्विवाहार्थंसुतस्यवै॥मुद्गलस्य गृहंगत्वाकन्यांतवसुतस्य
मे॥२६॥प्रदेहिकंन्यादानंच मुद्गलस्तमुवाचसः॥तथेतिच
पुनश्चोक्त्वा गंधतांम्बूल कान्बहून्॥२७॥दत्वातस्मै द्विज
श्रेष्ठो निश्चयंचचकारह॥एतस्मिन्नेवकालेतु सुतस्यब्रह्मचा
रिणः॥२८॥पाणिपादतलेदेहे वैंकुष्ठस्समदृश्यतः॥एवंकुष्ठे
न चाक्रांतो व्याधिभिर्बहुलैर्वृतः॥२९॥सचकुत्सितदेहस्स
न्विचचार चिरंभुवि॥एवंकुत्सितदेहस्तु स्वगुरुं प्राप्यखि
न्नधीः ॥३०॥ कृतांजलिपुटोभूत्वा प्रणम्य वहुधाद्विजं
॥ प्रार्थयामासविप्रेन्द्रं व्याधेस्तुपरिमोचनं॥ ३१॥ भग
वंस्त्वत्प्रसादेन व्याधयोमेव्यवस्थिताः ॥ यथानाशमुपे
ष्यन्ति तथाकुरुकृपानिधे ॥३२॥ तस्यतद्वचनंश्रुत्वा पु
नरेवमभाषत ॥ ज्ञानेनचक्षुषासर्वं विदितंतवदुष्कृतं ॥
३३॥ त्वन्निमित्तं महादेवः प्रोक्तवान्पितरंतव ॥ स्वप्ने
तवसुतस्यास्य विष्णोर्नामाभिधायिनं ॥३४॥ कुरुपुत्रं
ममप्रीत्यै इतिहोवाच शंकरः ॥ तस्यवाक्य मनादृत्य
कुल धर्मेण तेपिता ॥३५॥ नामकर्मच तेचक्रे शिवना
मांकितंपिता ॥ तेनदोष प्रभावेन वैंकुष्ठा व्याधयश्चताः
॥३६॥ पीडांकुर्वंति तेत्युग्रां तच्छांत्यै शृणु मद्वचः॥ उ
पायं प्रवदाम्यद्य ज्ञात्वादिव्येन चक्षुषा॥३७॥ पांड्यदेशे

पुण्यतमे क्षेत्रमस्तिजगत्पतेः ॥ श्रीवल्लिपुरमित्याख्यं सर्वपापौघनाशनं ॥३८॥स्थलाना मुत्तमंश्रेष्ठं विष्णोःप्रीतिकरंसदा॥तत्रपंकेरुहन्नामतीर्थमस्ति शुभोदकं ॥३९॥ तत्रस्नात्वाच पीत्वाच दृष्टाविष्णुं जगत्पतिं ॥पीत्वातीर्थं प्रतिदिनं तिलतैलेन पूरितं॥४०।व्याधिभि बार्ध्यतेयस्तु मुच्यते मंडलावधि ॥ तस्मात्वमपि गत्वातु स्नात्वातत्र-शुभोदके ॥४१॥ सेवित्वादेवनाथंच पूजयित्वा यथाविधि ॥ लेपित्वा देहमखिलं मंडला वधि भक्तितः।।४२॥ तीर्थोदके नमहता तैलपूतेन सादरं ॥ हविष्याशी जितक्रोधो विष्णुलांछन लांछितः ॥४३॥ सेवित्वातत्रबहुला न्ब्राह्मणा न्विष्णुभक्तकान् ॥ उषित्वामण्डलंतत्र व्याधिभि परिमोक्षसे ॥ ४४॥ तंविना तेह्युपायोन विद्यतेभुवनत्रये ॥ शीघ्रंगत्वा कुरुस्नानं भक्तिपूर्वं मतंद्रितः ॥४५॥ विष्णुचिन्हानि कृत्वातु विष्णुनामच भक्तितः ॥विष्णुभक्ता न्निषेव्याथ तत्स्थले वसतोदिनं॥४६॥ मण्डलावधितत्रैव वसविष्णुप्रियंकरः ॥ मण्डलांते व्याधिभिस्त्वं मुच्यसेनात्रसंशयः ॥४७॥ एवमुक्तस्तु गुरुणा कृत्वाचैवनमस्क्रिया ॥ अनुज्ञाप्य ययौगेहं स्वकीयंपितृसन्निधौ ॥४८॥ पित्रेनिवेदयामास गुरोर्वचनमादरात् ॥ तच्छ्रुत्वा प्रीतिसंयुक्त स्तथाकुरु सुताधुना ॥४९॥ द्रव्यमादायबहुशः प्रतस्थेतीर्थसेवया ॥ वयस्यैस्सहितोविप्रो

विष्णुसन्दर्शनादृतः ॥ ५० ॥ यत्लयत्रस्थलंशुद्ध तत्रस्ना
त्वाशनैःशनैः॥सं।वित्वादेवतास्सर्वा स्तोदाद्रिस्थल मा।वि
शत् ॥५१॥ स्नात्वापंके रुहेतीर्थे पापक्षयकरेशुभे ॥ ती
र्थदेवान्समुद्दिश्य कृत्वातर्पण मंजसा॥५२॥देवनाथाल
यंगत्वा स्तुत्वादेवंजनार्दनं ॥ विष्वक्सेनादि कान्देवा
न्यथावत्प्राणिपत्यच ॥५३॥ क्षेत्रोपवासंक्षौरंच चकारवि
धिपूर्वकं॥आज्येनबहुनादीपं वर्धयित्वाच संन्निधौ॥५४॥
षोडशेनोपचारेण पूजांकृत्वा यथाविधि ॥ रात्रौजागरणं
कर्तु मुद्युक्तोभूद्विजोत्तमः ॥५५॥ पीत्वातीर्थोदकंशुद्धंले
पयित्वास्वकंवपुः ॥ रात्रौजागरणंकृत्वा तस्यनामानिकी
र्तयन् ॥५६॥ प्रातर्व्योममणिंदृष्ट्वा स्नात्वाकृत्यंनिवर्त्यच
॥ देवदेवस्य भक्त्यावै अभिषेक कृतत्वरः ॥५७॥ तैलै
श्शुद्धतिलोत्पन्नै रभिषिच्य जनार्दनं ॥ तन्नैवेद्यन्बहुवि
धा न्कृत्वाघूपादिभिर्युतान् ॥५८॥ निवेद्यतस्मैभक्त्यातु
ताम्वूलंसंनिवेद्यच ॥ नीरांजनविधिंकृत्वा नमस्कारादि
काः क्रियाः ॥५९॥ ब्राह्मणान्भोजयित्वाथ विष्णुभक्ति
समन्वितान्॥ यत्किंञ्चिद्धनमादाय ब्राह्मणेभ्योददौपुनः
॥६०॥ मुक्ताहारादिकान्तस्य नवरत्नविभूषितान् ॥ व
स्त्रान्बहुविधांश्चापि बहुमूल्ययुतान्द्विजः ॥६१॥ महार्हा
णि विचित्राणि विविधानि नगात्मजे ॥ भूषणानि द
दौतस्य भक्तियुक्तेन चेतसा ॥६२॥ कृत्वासंकल्पविधि

व त्मण्डलावधिहेविभो ॥ हविष्याशी जितक्रोधो धर
णीशयनेनिशि ॥६३॥ आलयेतत्रदेवेश वसामिकृपयात
व ॥ दासस्यमेकृपांकृत्वा त्वन्नामधरणस्यवै ॥६४॥ त्व
च्चिन्हानिदधानस्य वेंकुष्टादीन्यपोहय॥इतिस्तुत्वा न-
मस्कारं भोजनंकुरुतेद्विजः ॥६५॥ वयस्यैस्सहधर्मात्मा
निवेद्यान्नंसभक्तिकः ॥ एवंदिनेदिनेकृत्वा मण्डलावा
धिवैद्विजः ॥६६॥ मण्डलांते विमुच्यासौ व्याधिकुष्ठा
द्यश्वताः ॥ दिव्यदेह धरोभूत्वा व्यरोचतद्विजोत्तमः
॥६७॥ तंदृष्ट्वादेवसंकाशं कुष्टाद्याभिसमन्वितं ॥ देवनाथे
तितंविप्र माव्हयंतिमुदान्विताः॥६८॥ तदाप्रभृतितन्ना
म लोकेविस्तारमच्छति ॥ श्वेतमृत्तिकयाफाले भुजयो
स्तावितोरिणा ॥६९ ॥ तुलसीमालयाचापि भूषितः प
द्ममालया ॥ देवनाथइतिख्यातो लोकेख्याति मगाद्वि
ये ॥७०॥ उद्यानानि विचित्राणि कृत्वाचैवविशेषतः
॥ आरामंमण्डपंचैव चकारबहुधाद्विजः ॥७१ ॥ एता
न्कृत्वाचबहुशो अनुज्ञाप्यचतान्द्विजान्॥सन्निधौदेवनाथ
स्यप्रार्थयित्वाभिवांछितं॥७२॥स्वपुरंगंतुकामोसा वश्रुणो
दशरीरकं ॥ गच्छसौम्यस्वकंदेशं मच्छासनपुरस्कृतः॥
७३ ॥ तत्रगत्वाद्विजश्रेष्ठ वृतांकन्यांमहात्मनः॥ विवाह्य
विधिनात्वंहि सुखीभवतयासह ॥७४॥ ममचिन्हानितेदे
हे तानिसर्वाणिवैद्विज ॥ तत्रस्थितानां मर्त्यानां शिवाचि

न्हाभिर्वैध्रुवं ॥ ७५ ॥ भवांस्तुमत्प्रसादेन विष्णुचिन्हा
निनान्यथा॥ प्रतिवर्षमिहागत्य सेवित्वादेवनायकं॥७६॥
प्रतिगच्छपुरमिति श्रुत्वावाक्यमैदेहिकं ॥ संतोषण समा
विष्टो वयस्यैस्सहधर्मवित् ॥७७॥ विष्णूचिन्हेन संयुक्तः
स्वगृहंगतवानसौ ॥ वंदित्वामातरंपश्चा त्पितरंचाभ्यवाद
यत्॥७८॥ तस्मैनिवेदयामास स्वस्यवृतांतमद्भुतं॥ श्रुत्वा
तुविस्मयाविष्टः पुत्रंसंतोष्यवैपिता ॥७९॥ उवाचपुत्रंसं
तुष्टो यथाहभगवान्हरिः ॥ तथाभवतुहेपुत्र शिवचिन्हा
न्वितंवपुः॥८०॥ दृश्यतेतवदेहच विष्णुचिन्हं नाविद्यते।
पुनःप्रत्याहपितरं तथाममवरंददौ ॥८१॥ विष्णुचिन्हं व
पुस्तेद्य दृश्यतेनान्यथाभुवि ॥तद्वपुश्शिवभक्तानां तथा
भवतुनान्यथा ॥८२॥ममचैववरोदत्तोह रिणालोकसाक्षि-
णा ॥ तस्मात्त्वेवंहिपितः शिवचिन्हनसंयुतं ॥८३॥ दृ
श्यतेमेवपुस्सम्यक् शिवभक्तियुतैर्जनैः ॥ एवंब्रुवाणंपुत्रं
परिष्वज्य पुनःपुनः ॥८४॥ आश्चर्येणसमाविष्टो विष्णु
मायादुरत्यया ॥ इतिनिश्चित्य मनसि विष्णुभक्तियुतो
द्विजः ॥८५॥ कर्तुंविवाहमुद्युक्तः पूर्ववृत्तांशुचिस्मितां॥
वसिष्ठगोत्रउत्पन्ना मुपयेमेविधानतः ॥८६॥ तयारेमेचि
रंकालं विष्णुभक्तिसमन्वितः॥ भुक्त्वाविविधभोगांश्च ज
नयित्वा बहून्सुतान् ॥८७॥विष्णुनाम्नाच संयुक्ता न्कृ
ष्णरामादिसंयुतान् ॥ पुत्रेषु भारंनिक्षिप्य संसारस्यमह

श्वसः ॥८८॥ विष्णुलोकमनुप्राप्य तद्विष्णोपरमंपदं ॥
प्राप्तवान्सर्वलोकस्य रक्षितुश्चक्रपाणिनः ॥८९॥ यइदंश्रृ
णुयाद्भक्त्या श्रावयेद्वानरस्तथा ॥ आधिभिर्व्याधिभिर्मु
क्तो द्विजपुत्रइवप्रिये ॥९०॥ सर्वकामानवाप्याथ विष्णु
लोकंगमिष्यति ॥ तोदाद्रिनाथस्य महिमाकेनवा पठ्य
तेधुना ॥९१॥ संक्षेपतोमयाप्रोक्त स्तवभक्त्याजगत्प्रभोः
॥ इतिस्कांदे पुराणे तीर्थवैभवखण्डे तोदाद्रिमहिमाक
थनंनाम अशीतितमस्सर्ग समाप्त॥ अत्रचतुर्दशः॥

पंचदशोध्याय प्रारंभ

श्रीमतेरामानुजायनमः

श्रीहर उवाचः श्रृणुदेवि महाश्चर्यं कथांकथयतोमम ॥
श्रुत्वातां सर्वपापेभ्यो मुच्येत मनुजोध्रुवं ॥१॥ पुराका
चित्सुशीलाच नाम्नाशंखनिधेस्सुता ॥ वीणागानरसा
भिज्ञा नर्तनेसा विचक्षणा ॥२॥ नानानादविनोदेषु
कलासुचविचक्षणा ॥ एवंसासुखिनी स्वार्थं सखीभि
सहितानिशं ॥३॥ विनोदान्विविधान्कृत्वा रेमेगीतैश्चि
रंप्रिये ॥ एकदामाधवेमासि स्नातुंताभिवृतानदीं ॥४॥
कावेरीमापपुण्यायां कलिकल्मषनाशिनीं ॥ स्नात्वाच
विधिवत्कृत्वा क्षोमगंधादि कांवहून् ॥५॥ कृत्वालंकरणं
सापि पूजार्थंचजगत्पतेः ॥ मल्लिकाजातिबकुल कुडजा

निवहून्यपि ॥६॥ अन्यानिविविधान्येव पुष्पाण्याहृत्यपे
टके ॥ चकारपूजांविष्णोश्च लक्ष्म्यासहमनोरमे ॥७॥
नवरत्नमयपीठे कल्पयित्वा यथाविधि ॥ आदित्य मंवि
कां विष्णुं गणनाथं महेश्वरं ॥८॥ एतानावाह्यविधिवत्
षोडशौरुपचारकैः ॥ पूजयित्वाजगन्नाथं स्तुत्वास्तोत्रैरस
भक्तिकं ॥९॥ वीणावादादिभिर्वाद्यै र्नर्तनंकुरुतेंचसा ॥
एवंबहुविधांकृत्वा उद्यापनकृतत्वरा ॥१०॥ तस्यामुद्यु
क्तमानायां स्नानंकर्तुं मनाद्विजः ॥ नाम्नाप्रियंवदइति
लोकेख्यातिंगतःप्रिय ॥११ सुघोषस्य सुतस्सम्यक् वेद
वेदाङ्गपारगः ॥ माध्यंदिनंकर्तुमना स्तस्यांतिक् मुपेयवा
न् ॥१२॥ तंदृष्ट्वारूपसंपन्नं वेदवेदान्तपारगं ॥ तन्वी
मोहवशंप्राप्ता सखीभिस्तिश्तृभिस्सहः ॥१३॥ त्यक्त्वा
तत्क्रियांसर्वां विप्रवर्येमनोदधे ॥ एतस्मिन्नेवकालेतु
द्विजपुत्रप्रसन्नधीः १४ स्नानंकृत्वायथान्यायं तर्पयित्वा
र्षिदेवताः ॥ माध्यंदिनादिकंकर्म निर्वर्त्यत्वरयासह ॥१५
स्वगृहंगंतुकामोसौ मनस्येवमचिन्तयत् ॥ रूपेणैतनगंतव्यं
नगृहंसांप्रतंपितुः ॥१६॥ दृष्ट्वामांबालकानुनं मदनेनसु
पीडिताः ॥ बलात्कारंकरिष्यंति अध्यमत्यंतरूपिणं ॥१७
इतिनिश्चित्यमनसि ह्यंतर्धानंगतोद्विजः ॥ तमदृष्ट्वाच ता
बाला मदनेन सुपीडिताः ॥१८॥ अन्विष्यचततःसर्वं वनं
वृक्षोपशोभितं ॥ कालातिक्रमणाभीत्या मातापित्रोश्च-

वालकाः ॥ १९ ॥ स्वगृहंचप्रविश्याथ पूर्ववत्स्वस्थमा
नसाः ॥ नचक्रुर्भोजनंचैव नास्वपन्कुत्रचित्स्थले॥२०।
किमिदंवहुभिपृष्ठा नोत्तरंकिंचिदब्रुवन् ॥ एवंयुगसमारा
त्रि स्तासामासित्प्रियेतदा ॥२१॥ प्रातरन्योममणिंदृष्ट्वा
कथंचिद्धैर्यमास्थिता ॥ पूर्ववत्समुपागम्य कावेरींपापना
शिनीं ॥२२ ॥ स्नात्वाकृत्यानिनिर्वृत्य तिरोधानं गता
श्चताः ॥ एकान्तेकुत्रचित्स्थाने तस्थुर्दृष्टुमनाद्विजं॥२३
एतस्मिन्नेवकालेतु ब्रह्मचारीप्रियंवदः ॥ स्नानार्थमाग
तस्तत्र शंकमानः शनैश्शनैः ॥२४ ॥ स्नात्वाविधिवदा
चम्य कृत्यंनिरवृत्यसत्वरं ॥ स्वगृहंगंतुकामेतु तास्मिन्न
वसरेप्रिये ॥२५॥ शीघ्रंगत्वा सुशीलाद्या बब्रुस्तंद्विजपुं
गवं ॥ मत्तंवनान्तेषाष्ठिक्यं वाशिकाइववारणं ॥२६॥
ऊचुःप्रांजलयोभूत्वा विनयाचारपूर्वकं ॥ अस्माकंपाणि
मद्यैव गृहाण्वद्विजसत्तम ॥ २७ ॥ तासांतुवचनंश्रुत्वा
प्रत्युवाचद्विजाग्रणीः ॥ तथाभवतुहेसौम्या ब्रह्मचर्यपरा
यणः ॥ २८ ॥ दक्षिणांचप्रदत्वातु गुरवेयदभीप्सितं ॥
अनुज्ञातस्ततस्तेन पितृभ्यांचयथाविधि ॥२९॥ निर्वृत्य
गोदान विधिं गृह्णामिकरपंकजं॥युष्माकंविधिनासम्यकु
तथाकुरुतबालकाः ॥ ३०॥ तस्यतद्ववचनंश्रुत्वा प्रत्यूचु
स्ताश्शुचिस्मिताः ॥ विषादप्यमृतंग्राह्य ममेध्यात्कांचनं
तथा ॥३१ ॥ नीचादप्युत्तमाविद्या कुलहीनात्सुकन्य

का ॥ एवंवदन्तिबहुशो वेदवेदान्तपारगाः ॥३२॥ तस्मा
त्वंमनुजोविद्वा न्वयंचसुरकन्यकाः ॥ त्वंकुतश्चवयंचैव दै
वमेवात्रकारणं ॥ ३३ ॥ तस्माच्छीघ्रंगृहाणत्व मस्मत्पा
णिं द्विजोत्तम॥एवमन्योन्यमाभाष्य चिरंकालद्विजश्चताः
॥ ३४ ॥ तस्थुस्तत्रैवमोहेन सुशीलाद्यामिथःक्षणात् ॥
बलात्कारंचकृत्वाथ रन्तुमारेभिरेतदा ॥ ३५ ॥ दृष्ट्वाता
सांचसंरंभं कोपेनकलुषीकृतः ॥ शप्तुमारभतेभीरु स्ता
श्चयस्मा त्पिशाचवत् ॥३६ ॥ मांस्पृष्टास्तेनपापेन पिशा
च्योभवतक्षणात्॥ इतितस्यवचःश्रुत्वा सुशीलाद्यास्सुदुः
खिताः ॥३७॥ प्रत्युचुर्बाष्पकंठ्यश्च विनयाचारपूर्वकं ॥
अपराधमकुर्वत्सु जनेष्वपिविशेषतः ॥ ३८ ॥ हितंकुर्वंति
विद्वांस इतिलोकेषु विश्रुतं ॥ अहितंकुरुतेयस्तु नरकेषू
निपात्यते ॥३९॥ तस्मात्वमपिशापेन पिशाचोभवभूसुर
॥ एवमन्योन्यशापेन बभुवू स्तत्क्षणात्तथा ॥४०॥ एवं
विप्रवरश्चापि ताश्चकन्यास्तथाप्रिये ॥ पिशाचश्चपिशाच्य
श्च क्षुत्पिपासादिपीडिताः ॥४१॥ क्रंदमानारुदन्तश्चेरु
श्चबहुलंसमाः ॥ बहुकालंगतेतस्मि न्दैवयोगेनतस्यवै
॥४२॥ तासांचमोक्षकालोहि समपद्यततत्क्षणात् ॥ वै
शाखेमासितत्रैव स्नातुमभ्यागतोमुनिः ॥४३॥ नाम्ना-
वेदनिधिर्विप्रः कावेर्यांप्रातरागतः ॥ प्रियंवदस्यजनकः सु
घोषोब्राह्मणोत्तमः ॥४४॥ सोपिमाध्यान्हिकंस्नानं कर्तुं

मभ्यागतःक्षणात् ॥ दृष्ट्वावेदनिधिंविप्रं स्वसुतं वालका
श्चताः ॥४५॥ दृष्ट्वापरमदुःखार्त श्शरणंसमुपागमत् ॥
द्विजंवेदनिधिंप्राह विनयाचारपूर्वकं ॥४६॥ भगवंस्त्व-
त्प्रसादेन मिथःशापात्सुदुःखिताः ॥ पुत्रश्चममवालाश्च
पिशाचींतनु माश्रिताः ॥४७॥ त्वद्दर्शनेनसंत्यक्ता भवं
तुद्विजपुङ्गवा क्लेशात्परमदुःखाच्च तथाकुरुकृपानिधे॥४८
तस्यतद्वाक्य माकर्ण्य प्रोवाचअमृताक्षरं ॥ ध्यात्वाम-
नसि दुःखंच तासांवैद्विजपुङ्गवः ॥४९॥ प्रत्युवाच द्वि-
जश्रेष्टं स्मितपूर्वं प्रसन्नधीः ॥शृणुद्विज कुमारस्य कुमा-
रीणां मिथःकृतं ॥५०॥ शापंमोक्तुंनान्यदस्ति भुवनेस्मि
न्द्विजोत्तम ॥ तोताद्रिरितिविख्यातो देशेपाण्ड्यमही
पतेः ॥५१॥ अस्तिदक्षिणदेशेच ताम्रपर्ण्याश्च दक्षिणे
॥ योजनद्वयमाश्रित्य तिष्टत्यद्भुतदर्शनः ॥५२॥ तत्रपं
केरुहंनाम तीर्थमस्तिमहत्तरं ॥ तत्रस्नात्वानरोभक्त्या सर्व
पापैःप्रमुच्यते ॥५३ । सेवित्वादेवदेवेशं जगतांपतिमव्ययं
॥ विष्णुंजितेन्द्रियोमर्त्यः सर्वान्कामानवाप्स्यति ॥५४॥
माघमासे विशेषेण स्नात्वातत्रसरोवरे ॥ संतर्प्यऋषि-
देवांश्च पितॄणांश्चविशेषतः ॥५५॥ यथाशक्तिंच दत्वातु
तत्रस्थानां द्विजन्मनां ॥भक्त्यापरमयायुक्तः सेवित्वा दे
वनायकं ॥५६॥ प्रदक्षिणनमस्कारा न्पूजांचैवविशेषतः
॥ अभिषेकोदकंशुद्धं सर्वपापप्रणाशनं ॥५७॥ तैलमिश्रं

शिरःप्रोक्ष्य प्राशित्वानिर्मलंशुभं ॥ निवेद्यान्नंच भुक्त्वा
तु सर्वपापैःप्रमुच्यते ।५८। तस्मात्पुलस्यतेविप्र कन्यका
नां दिवौकसां ॥ मिथशापविमोक्षार्थ मुपायंश्रृणुसादरं
॥५९॥ तोदाद्रिस्थलमागत्य माघमासेनिरंतरं ॥स्नात्वा
पंकेरुहेतीर्थे सर्वपापप्रणाशने ॥६०॥ सेवित्वादेवदेवेशं
पीत्वातीर्थोदकंशुभं ॥ एतेषामपि सर्वेषां प्रोक्ष्यतीर्थंसु
पावनं ॥ ६१ ॥ माघावधि निराहारो भवतत्सान्निधौ
मुने ॥ माघान्ते गरुडारुढं लक्ष्म्यासह जनार्दनं
॥ ६२ ॥ अभिषिच्यशिवेनैव शंखतोयेन वैद्विज ॥
शापाद्विमोच्यतेनूनं पुत्रंकन्याश्च ताध्रुवं ॥ ६३ ॥
अहंददःमिद्यासांच पुलस्यगमनंप्रति ॥ आकाशेनैवमार्गेण
तत्रगच्छन्तुसत्वराः ॥ ६४ ॥ तत्रगत्वा कुरुस्नानं मकरे
समुपस्थिते ॥ इतितस्य वचःश्रुत्वा ब्राह्मणोवेदपारगः
॥६५॥ स्त्रीसमेतः सर्वधनं गृहीत्वा द्विजसत्तमः पिशाच
रूपं पुत्रंच समाहुयच कन्यकाः ॥६६॥ सगत्वादूरमध्वा
नं पथिविश्रम्यतैःसह ॥ तोदाद्रिस्थल मावेश्य ह्यनुज्ञा
प्यच तान्द्विजान् ॥ ६७ ॥ आचम्यविधिव त्कृत्वा स्ना
नंपंकेरुहशुभे ॥ तर्पयित्वर्षिदेवांश्च पितृंश्चैव तिलोदकैः
॥६८॥ देवदेवं जगन्नाथं नत्वास्तुत्वा यथाविधि ॥ पूजां
कृत्वा यथान्याय मुपवासं चकारह ॥६९॥ रात्रौजागर
णंकृत्वा पुराणै स्तोत्रपाठकैः ॥ अपरेद्युर्यथान्यायं स्त्री

दमेतः प्रसन्नधीः ॥७०॥ स्नात्वाकृत्यंच निर्वृत्य सेवित्वो
सवनायकं ॥ अभिषिच्यचतैलेन नैवेद्यान्विविधान्ब
हून् ॥७१॥ अपुपाद्यामि संयुक्ता न्निवेद्य विधिपूर्वकं ॥
ताम्बूलंच निवेद्याथ भोजयित्वा वहून्द्विजान् ॥ ७२ ॥
दक्षिणांच यथाशक्ति दत्वातेभ्योद्विजोत्तमः ॥ भुक्त्वास्व
वंधुभिः सार्धं भार्ययाच द्विजोत्तमान् ॥७३॥ अवसद्भा
र्ययासार्धं तोदाद्रौ पुण्यवर्धने ॥ माघमासेगते तस्मि
न्विप्रोधर्मपरायणः ॥७४॥ त्रिकालं विधिवत्कृत्वा स्ना
नं होमं जपंतथा ॥ सेवनंचमहाविष्णोः प्रदक्षिण नम
स्क्रियाः ॥७५॥ कृत्वासुखेन तत्रस्था न्विष्णुभक्तांश्च
भक्तितः ॥ नमस्कृत्वा प्रतिदिनं यत्किंचिद्दान माचरन्
॥७६॥ दत्वाच वैष्णवेभ्यश्च उवास सुचिरंद्विजः ॥ मा
घमासेतु संप्राप्ते भार्यासार्धं सरोवरे ॥७७॥ स्नानंकृत्वा
यथापूर्वं किंचिदभ्युदितेरवौ ॥ माघस्नानंच कृत्वाथ
तस्यमासस्य संभवां ॥७८॥ कथांश्रुत्वा यथाशक्ति दत्वा
दानंसभक्तिकं ॥ माघमासेतु यत्कृत्यं कृत्वातच्च विशेषतः
॥७९॥ पंकतामरसेतीर्थे तीर्थेनच शुभेनसः ॥ अभिषि
क्तेन विष्णोश्च पिशाचं प्रोक्ष्यवालकाः ॥ ८० ॥ प्राश
यित्वा प्रतिदिनं प्रार्थयामास भक्तितः ॥ देवदेवं जग
न्नाथ कारुण्य निलयाच्चुत ॥८१॥ अप्रमेयादि रूपाय
श्रृष्टिस्थित्यन्त कारिणे ॥ देवनाथाय भक्ताना मभीष्ट

फलदायिने ॥८२॥ नमोहिरण्यगर्भाय नोदाद्रिनिलया
यच ॥ मार्कण्डेयेन मुनिना भृगुणातोषितायच
॥ ८३ ॥ त्वत्स्थले वसतांपुसा मभीष्ट फलदायिने
॥ नमोनमः पुनस्तुभ्यं सच्चिदान्दरूपिणे ॥ ८४ ॥
पाहिमां कृपया विष्णो पुत्रंममच बालकाः ॥ मिथश्शा
पेन दुःखार्ताः पिशाचा अभवन्प्रभो ॥८५॥ तस्यतासां
चहेविष्णो प्रसादं कुरुसांप्रतं ॥ इतिस्तुतो महाविष्णु र्दे
वनाथो जगत्पतिः ॥ ८६ ॥ उवाच द्विजवर्यंतं स्मितपूर्वं
प्रसन्नधी ॥ श्रीहरिरुवाचः ॥ शृणुविप्र वरश्रेष्ठ विष्णु
भक्तो त्तमोत्तमः॥८७॥ स्नानात्पाना द्दर्शनाच्च ममसर्वोप
चारणात्॥प्रीतोस्मिस्तुतिनानेन यत्तेकांक्षित मद्यवै॥८८
तथाभवतु विप्रेन्द्र सुखीभव दृढव्रत ॥ यदाह मांभवा
न्पूर्वं तथाभवतु निश्चयः ॥८९॥ इत्युक्तमात्रे लक्ष्मीशे
पिशाचीतनुमु त्सृजन् ॥ पूर्वदेहमनुप्राप्ता स्सर्वावयव
शोभनाः ॥ ९० ॥ पुरस्थितं महाविष्णुं दृष्ट्वाविप्रसुतश्च
ताः ॥ प्रणिपत्य स्तुतिंकृत्वा तस्थुरग्रे हरेश्चते ॥९१॥
दृष्ट्वातां व्रतसंयुक्ता न्शंखतोयेन वैहरिः ॥ अभिषिच्य
शिरस्तासां तस्यविप्र सुतस्यच ॥९२॥ उवाच मधुरां
वाणीं लक्ष्म्यासार्धं जगत्पतिः ॥ हेविप्रवर मद्वाक्यं शृ
णुत्वं त्वत्सुतश्चताः ॥९३॥ आसांतुपाणिमद्यैव गृह्णातु
तवपुत्रकः॥ यद्यदिच्छसि विप्रेन्द्र तत्सर्वं भवतुध्रुवं ॥

९४॥ इत्युक्त्वा देवनाथोमु मंतर्धान मगात्क्षणात्॥ तत
स्तद्वचनंश्रूत्वा कारयामास वैदिकं ॥९५॥ विवाहंविधि
वच्चक्रे यथाविधियथाक्रमं ॥ विवाह्य कन्यांविप्रेन्द्रः पि
तृभ्यामभि नान्दितः ॥९६॥ ब्राह्मणा विष्णुभक्तैश्च आ-
शीर्भिरभिनन्दितः ॥ तेषांतत्रैव समतिं चकारपरयामुदा
॥९७॥ कृत्वापंकेरुहेस्नानं नमस्कृत्वा जगत्पतिं ॥ शुश्रू
षणरतोनित्यं द्विजःस्त्रीभिश्च संयुतः ॥ ९८ ॥ पितृभ्यां
बंधुभिः सार्धं विष्णुलांछन लांछित ॥ तत्रैववसतिंचक्रे
पुत्रपौत्रै समन्वृत ॥९९॥ भोगांश्च विविधान्भुक्त्वा देवै
रपि सुदुलर्भान् ॥ अंतोविष्णुपदंप्राप्तो भार्याभि स्सहवै
द्विजः ॥१००॥ एवंतत् क्षेत्रमतुलं पिशाचत्वविमोचनं
॥ यश्शृणोति सदालोके नरःपापात्प्रमुच्यते ॥ १०१ ॥
माघमासे विशेषेण यःपठे त्सततंनरः ॥ शृणुयाच्चापियो
विद्वा न्सर्वपापैः प्रमुच्यते ॥१०२॥ एतदाख्यान मायु
ष्यं पुत्रपौत्राभि वर्धनं ॥ यःशृणोति सदालोके नरःपा
पा त्प्रमुच्यते ॥१०३॥ तत्स्थलेदेव नाथस्य सान्निधौ या
द्विजोत्तमः ॥ एतंपुराणं पठति भक्त्यायस्तु शृणोतिच ॥
१०४॥ पुत्रकामो लभेत्पुत्रा न्धनकामो धनंलभेत् ॥ ग
र्भिणी जनयेत्पुत्रं कन्याभर्तार माप्नुयात् ॥१०५॥ ऋ
णार्द्धिणा द्विमुच्येत रोगीरोगा द्विमुच्यते ॥ दरिद्रोपिच
दारिद्र्या त्पापीपापा द्विमुच्यते ॥१०६॥ श्रियमाप्नोति

परमां श्रीकामस्तु सदापठेत्॥ क्षत्रियोजय माप्नोति वै
श्योवर्द्धन्तु संपदं ॥ १०७ ॥ शुद्राश्च विष्णु भक्तास्स्यु
रन्येप्राप्स्यंति चामृतं ॥ यएतत्स्थल माहात्म्यं लिखि
त्वा पठीतुंस्थले॥ १०८ ॥ ददातिविष्णुलोकेसः पुत्र
पौत्रै र्महीयते ॥ गृहेतिष्टतियस्येदं स्थलमहात्म्य मुत्तमं
॥१०९॥ सपूमा न्वैष्णवेलोके नित्यवासं करिष्यति ॥
शौनकाद्या मुनिश्रेष्टा यूष्माभिः पृष्ठमादरात् ॥ ११०॥
कथितंच मयासर्वं तोदाद्रिस्थल वैभवं ॥ यूष्माकं सह
वासेन सल्लापे नच सेवया ॥१११॥ कृतार्थोस्मि मुनि-
श्रेष्ठा भवतां दर्शनेनच ॥ अत्यद्भुतं मिदंशुद्धं तोदा
द्रिस्थल वैभवं ॥ ११२॥ शृण्वतः पठतोवापि तस्यसर्वे
ऽपि विभ्यति ॥ भूत प्रेत पिशाचाद्यै र्ग्रस्तायेच मलैरपि
॥११३॥ एतत्श्रवणमात्रेण मुक्तास्स्यु स्तेनसंशयः ॥ रा
जद्वारे विवादेवा श्मशाने शत्रुसंकटे ॥११४॥ भूतसंघे
वनेचैव दावाग्नौ जलमध्यतः ॥ सिम्हव्याघ्र गजादिभ्यो
भयकाल उपस्थिते ॥ ११५ ॥ तदापठनमात्रेण मुच्यते
सर्वभीतिभिः ॥ एवंसूतेन कथितं श्रुत्वातोदाद्रि वैभवं
॥११६॥ कृतार्थास्म इतिप्रोक्ता नैमिशारण्यवासिनः।
बहुमन्यंत तंसूतं शौनकाद्या ऋषीश्वराः॥ ११७ ॥ इ
तिस्कांदे पुराणे तीर्थवैभवखण्डे तोदाद्रि महात्म्ये पै
शाच विमोचनंनाम एकाशीतितमस्सर्गः अत्रपञ्चदशः

श्रीतोताद्रिमाहात्म्यम् स्कान्दपुराणांतरगतसमाप्तम् ॥

अथ षोडशोध्याय प्रारंभः

॥ श्रीमतेरामानुजायनमः ॥ श्रीमते शठको पायेनमः श्रीमद्वरवर मुनयेनमः ॥ व्योमशैल माहात्म्यं ब्रह्मनारसिंम्हं ॥ श्रीशौनकउवाच ॥ सूतपुत्र महाभाग श्रुतंसर्वं मयानघ ॥ क्षेत्राणां चैव माहात्म्यं तीर्थानांच विशेषतः ॥ १ ॥ त्रैलोक्यां तरगतं वृत्तं यत्तत्पूर्वं दयालुना ॥ भूयःपुत्र महाभाग श्रोतुमिच्छामि वैभवं ॥२॥ अस्तिदक्षिण दिग्भागे रोमशाख्यं महत्स्थलं ॥ एवमुक्तं त्वयापूर्वं प्रसंगा त्तत्रैपुनः॥३॥ कुरंगाख्य महापुण्यं कुरुकापिच वैमुनेः॥ त्वत्सकाशात् श्रुतं पूर्वं रोमशाख्यंतु नश्रुतं ॥४॥ इदानीं श्रोतुमिच्छामि तस्यक्षेत्रस्य विस्तरात् ॥ वक्तुमर्हसि धर्मज्ञ सर्वंजानासि वैभवान् ॥५॥ एवंपृष्टतस्तेनैव शौनकेन महामतिः ॥ वक्तुप्रचक्रमेतस्य रोमशाख्यस्य वैभवं॥ ६॥ श्रीसूतउवाचः॥ अहंतत्ते प्रवक्ष्यामि रोमशाख्यस्य वैभवं ॥ श्रोतारं वाथवक्तारं पुनाति दशपूर्वकं ॥७॥ रोमशोनाम विप्रेन्द्रो दीर्घजीवी महत्तपः ॥ प्रयटन्पृथिवी स्सर्वा श्शंखचक्रधरंहरिं ॥८ ॥ द्रष्टुकामो महायोगी इत्थंचिन्तितवान्सदा ॥ कथंद्रक्ष्याम्यहं विष्णुं

देवदेवं जगत्पतिं ॥९॥ सर्वयोगेश्वरंकुव प्रसादसुमुखं
हरिं ॥ एवंचिन्तितवान्पूर्वं गंगाकूलं समाश्रितः ॥१०
तस्मिन्क्षणे तदाविप्रा वागुवाचा शरीरिणी ॥ व्योम
स्थाच महाभागं रोमशाख्यं महामुनिं ॥११॥ वाग्यो
वाचः ॥ भोभोविप्र महाभाग रोमशेदं श्रृणुष्वह ॥
कस्त्वंशोचासि विप्रेन्द्र विष्णुं द्रक्ष्यसियेनवै ॥१२॥ हेतु
ना विप्रवर्याशु तद्वदाम्यहमादरं ॥ यज्ञदानतपोभिस्तं
न हिद्रक्ष्यति मूनुगः ॥१३॥ विनाभक्ति महाभाग त
स्मात्भक्तेस्तु संभवं॥सिध्यत्येव तवैवाशु स्थानमाहात्म्य
गौर तु ॥१४॥ तत्स्थानं गम्यतामाशु माविलंबिम
वैभवान् ॥ अस्तिकाचिन्महापुण्या ताम्रपर्णीति नामतः
१५॥विख्याता पावनाविप्र नदीनां प्रवरामुने ॥ मलयाच्च
संभूता दक्षिणायांच वैदिशि॥१६॥ तस्यास्तु दक्षिणेभ
योजनस्य द्वयमुने ॥ अर्धयोजन मात्रेतु कुरुंगात
पूर्वके ॥ १७ ॥ योजनानां त्रयेतद्वत्पूर्वांभोधेस्तु प
कन्यकायास्तु विप्रेन्द्रोदीच्यां योजनेद्वय ॥ १८
स्याथ महत्स्थानं विष्णोः प्रीतिकरंशुभं ॥ योजन
विस्तारं दिव्यस्थानं महामुने ॥ १९ ॥ अद्वस्य
विष्णु स्तत्रचास्ते श्रियासह ॥ व्योमशैलेति ि
मध्येकृत्वा महत्पदं ॥ २० ॥ क्षेत्रंदिव्यं महर
षिभिः परिसेवितं ॥ पुण्यवृक्ष समाकीर्णं

भिरावृतं ॥ २१ ॥ वापी कूप तटाकैश्च शतपत्रै रलं
कृतं ॥ कल्हाराद्यै स्तथान्यैश्च पुण्यपुष्पै रलंकृतं
॥ २२ ॥ एवंभूतं महाक्षेत्रं सर्वसिद्धि करंमुने ॥
गंतुमर्हसि विप्रेन्द्र स्थानंतत्कमलापतेः ॥ २३ ॥ अ-
तिप्रियतमं विप्र यदीच्छसि जगत्पतिं ॥ द्रष्टुंसुलभ-
तो विप्र माविलंबतु वैभवात् ॥ २४ ॥ एतच्छ्रुत्वा तदा-
विप्रो रोमशोपि महामुनिः ॥ अतीवतोषं संप्राप्य द-
क्षिणाभिमुखोययौ ॥ २५ ॥ यथाश्रुतं तथादृष्ट्वा क्षेत्रं
तत्र महाद्भुतं ॥ उवास कतिचित्कालं तपसातोषय-
न्हरिं ॥ २६ ॥ स्तोत्रेणा राधयन्भूयः कृत्वाचोग्रं तप
स्ततः ॥ रोमशउवाचः ॥ नतोस्मिनित्यं जगदेकवंद्यं
वेदान्तवेद्यं परिणामहीनं ॥ अचिन्त्य मव्यक्त मरूपिणं-
तं ब्रह्माभिधान गुणहीनमाद्यं ॥ २७ ॥ शक्यंहिनक्तुं
मुनिभिस्तस्थान्यै रस्तीतितस्य प्रकृतेः परन्तं ॥गन्तुं
नशक्यं त्वथचेंद्रियैश्च बुध्यातुलभ्यं त्वपियोगिनांहि ॥
२८ ॥ समाधिभि पूरितमानसानां द्रष्टुंसुशक्यं मनसा
विदूरं ॥ अयोगिनां दुष्कृतकारिणांच तमादिपूर्षं प्रण
तोस्मिनित्यं ॥ २९ ॥ ब्रह्मादिभि र्देववरैर्नशक्यं द्रष्टुंच
तस्य वमनसाकिमन्यैः ॥ ध्यातुंनशक्यं मनसापिसाध्यै
तमादिदेवं पुरुषंनतोस्मि ॥ ३० ॥ नमस्तस्मै नमस्त
स्मै पुरुषाया मितौजसे ॥ यस्यस्मरणमात्रेण संसारं